उन्निद्र unnidra, *adj.* Sleepless. **उन्निद्राम्** 2 *c. sin. f.* (**त्यक्तनिद्राम्, उत्सृष्टनिद्रां, जागरूकां**).

उन्मुख unmukha, *adj.* Looking upwards. **उन्मुखी** 1 *c. sin. f.* **उन्नतं (प्रकाशं गतं) मुखं यस्याः सा—उन्मुखीभिः** 3 *c. pl.* (**ऊर्ध्वीकृतवदनाभिः**) "Through apprehension that the sky may fall."

उन्मेष unmesha, *s.m.* A winking or twinkle of the eyes.

उप upa, *prep,* By, near.

उपकर्तुम् upakartum, *inf.* of **कृ** kṛi, with **उप** upa, To aid, help, assist, render a service.

उपकार upakāra, *s.m.* Aid, assistance, help. **उपकारः** 1 *c. sin. m.*

उपगत upagata, *p.p.* (of **गम** gam, Go, with **उप** upa) Gone near, encountered, met; mingling. Obtained. Befallen. **उपगतः** 1 *c. sin. m.* **उपगतम्** 1 *c. sin. n.* (**प्राप्तम्, उपस्थितं, घटितं**).

उपगम upagama, *s.m.* Approach. **उपगमज,** upagamaja, *adj.* Born or springing up on the arrival. **उपगमजम्** 1 *c. sin. n.* (**भवदागमसम्भवं, मेघोपगमजं, वार्षिकं**).

उपगूढ upagūḍha, *p.p.* (of **गुह** guh, with **उप** upa) Embraced. *s.n.* An embrace. **उपगूढम्** 1 *c. sin.*

उपचित upachita, *p.p.* (of **चि** chi, Gather, with **उप** upa) Collected, assembled; increased, augmented; heaped. **उपचितैः** 3 *c. pl. n.*

उपचितबलिम् upachita-balim, **उपचितो (दत्तो) बलिः (पूजाद्रव्यं) यस्मै—(विरचितपूजाविधिम्—उपढौकितपूजोपहारम्—उपहितबलिं).**

उपचितरसाः upachita-rasāḥ, **उपबृंहितरसाः सन्तः—प्रवृद्धतृष्णाः, दृढतरानुरागाः.**

उपचितवपुः upachita-vapuḥ (**संवर्धितशरीरः सन्—उपचिताकृतिः, स्थूलशरीरः, प्रवृद्धशरीरः, परिपुष्टशरीरः, स्फीतमूर्तिः—तव धूमघटितं शरीरं तद्धूमेन मिलितं सत् पुष्टं भावि—मेघस्य धूमयोनित्वात् वर्धितशरीरः सन्**).

उपजिगमिषु upajigamishu, *agt.* Desirous of going near, anxious to approach. **उपजिगमिषोः** 6 *c. sin.* (**उपगन्तुमिच्छोः**).

उपतटम् upataṭam, *ind.* Near the skirt. **प्रान्तदेशसमीपे, तटस्य समीपम्, तटानां समीपे.**

उपपाद्य upapādya, *fut. p.p.* (of **पद्** Go, with **उप** upa) To be effected, done, demonstrated, or proved. **उपपाद्यः** 1 *c. sin. m.* (**कार्यः, करणीयः, सम्पाद्यः रचनीयः**). **त्वया तस्याः कार्श्यं वृथा खण्डयितव्यं.**

उपप्लव upaplava, *s.m.* Disaster, catastrophe, calamity. उपप्लवम् 2 *c. sin.* (उपद्रवम्).

उपमेय upameya, *fut. p.p.* (of मा mā, Measure, with उप upa) To be compared, comparable. उपमेयाम् (उपमातव्याम्, उपमार्हां "Worthy of comparison"). हरवृषभस्य शुभ्रत्वात् हिमत्वं "Snowiness," मेघस्य श्यामवर्णत्वात् पङ्कत्वं "Muddiness." Daṇḍi says:

न लिङ्गवचने भिन्ने न हीनाधिकता ऽपि वा।
उपमादूषणायालं यत्रोद्वेगो न धीमताम्॥

"Neither gender or number being different,—neither deficiency or redundancy are sufficient to mar a comparison, provided sensible persons be not shocked."

उपयुज्य upayujya, *ind. p.p.* of युज yuj, Join, with उप upa, Take (as meat or drink). (गृहीत्वा, सेवित्वा, पीत्वा, आदाय, उपभुज्य).

उपरि upari, Up, upward, above (ऊर्ध्वं).

उपल upala, *s.m.* A rock, a stone.

उपलविषमे upala-vishame, उपलैः (प्रस्तरैः or पाषाणैर्) विसदृशे (निम्नोन्नते)—पाषाणेन उच्चनीचीभूते—पाषाणश्लिलादन्तुरे pāshāṇa-śilā-danture.

उपवन upavana, *s.n.* A garden, a grove (आराम).

उपहार upahāra, *s.m.* A complimentary gift, a present to a superior. उपहारः 1 *c. sin.* (उपढौकनं).

उपान्त upānta, *adj.* Near, close to. *s.n.* Side, skirt, base. उपान्ते 7 *c. sin.*

उपान्तस्फुरिततडितम् upānta-sphurita-taḍitam, उपान्ते upānte (समीपे) स्फुरिता (दीपिता) तडित् (विद्युत्) यस्य तं (त्वां).

उपेक्षेत upekshēta, *pot. ātm.* of ईक्ष īksh, 1 *cl.* See, with उप upa, Leave, abandon, neglect (त्यजेत्, अवधीरयेत्).

उर्वी urvī, *s.f.* Earth, ground. उर्वीम् 2 *c. sin.* उर्व्याः 6 *c. sin.* (पृथिव्याः, भूमेः).

उल्का ulkā, *s.f.* A spark, flame. A torch, brand.

उल्काक्षयितचमरीबालभारः ulkā-kshayita-chamarī-bāla-bhārah, उल्काभिः (ज्वालाभिः, स्फुलिङ्गैः) क्षयितः (दग्धः, प्राप्तनाशः or नाशितः) चमरीणां (मृगभेदानां, मृगविशेषाणां) बालभारः (केशसमूहो or पुच्छस्थकेशवृन्दं) येन तादृशः सन्.

उल्लङ्घित ullaṅghita, *p.p.* (of लघि lagh-i, Go, with उत् ut) Passed over or beyond, advancing without obstacle, impediment, or difficulty.

उल्लङ्घिताध्वा ullaṅghitādhwā (अतिक्रान्तो ऽध्वा (पन्था) येन स तथा or तादृशः सन्).

उष्ण ushṇa, *adj.* Hot, scorching, scalding. Sharp, acute. उष्णम् 2 *c. sin. m.* उष्णाभिः 3 *c. pl. f.* उष्णैः 3 *c. pl. n.* (अशीतलैः). ग्रीष्मसन्तापिता हि नवघनजलकणलाभाद् वाष्पमुष्माणं वमन्ति grīshma-santāpitā hi nava-ghana-jala-kaṇa-lābhād vāshpam ushmāṇam vamanti. इयन्तु पर्वतनिर्झरोत्प्रेक्षा "This is a poetical comparison of the mountain-torrents." स्निग्धानां विरहसङ्कतानां वाष्पपातो भवति.—यश्च विरहविधुरो भवति सो ऽपि प्रियजनसंयोगमवाप्य उष्माणमश्रु मुञ्चतीति.

ऊ ū, long, as in "rule," "rude."

ऊन ūna, *adj.* Less. ऊनः 1 *c. sin. m.*

ऊरु ūru, *s.m.* The thigh. ऊरूः 1 *c. sin.*

नखक्षतानि पश्यन्त्या गूढस्थानेषु योषितः।
प्रियस्मृतेरभिनवा प्रीतिर्भवति पेशला॥

"Pleasure new [and] lively, from the remembrance of a lover, arises [in the mind] of a woman whilst beholding nail-marks on the parts [usually] concealed."

ऊर्ध्वं ūrdhwam, *ind.* Upwards; onwards, further.

ऊर्मि ūrmi, *s.m.* A wave.

ऊर्मी ūrmī, *s.f.* A wave. A current, flowing of water.

ऋ ṛi, as in "writ," "rill."

ऋतु ṛitu, *s.m.* A season (of which there are six).

ऋषि ṛishi, *s.m.* A sage, saint. ऋषीन् 2 *c. pl.*

ए e, as in "there," "whey."

एक eka, *pronom.* One, a, a single. Unique, peerless, matchless. Lone, solitary. एकः 1 *c. sin. m.* एकम् 2 *c. sin. m.* or 1 *c. sin. n.* एकाम् 2 *c. sin. f.*

एकपत्नी eka patnī, *s.f.* A faithful wife (एक एव पतिर्यस्याः सा). एकपत्नीम् 2 *c. sin.*

एकवेणी eka veṇi, एकीकृत्य बद्धा वेणी.—एकभूतवेणी. वेणीबन्धनं प्रोषितनाथानामाचारः

"Binding of the braid is an established custom of those whose lords are absent from home."

It is said:

तथा प्रोषितनाथा या व्यसनाभिद्रुताशयाः।
वेशः स्यान्मलिनस्तासाम् एकवेणीधरं शिरः॥

"Thus, the raiment of those who have their lords away from home, whose purposes are crossed by ill-luck, should be soiled, the head wearing a single braid."

It is said:

सम्भोगे ये सुखं कुर्युस्ते दुःखं विरहे भृशम्।

"They who enjoy most in fruition, suffer most in absence."

एकस्थ ekastha, *agt.* Standing together, combined, collected in one place. **एकस्थम्** 1 *c. sin. n.* **एकस्थले स्थितं—एकत्र (वस्तुनि) स्थितं (न वर्तते).**

एकान्ततस् ekāntatas, *ind.* Solely, only, exclusively. **(सर्वप्रकारेण, अत्यर्थं, नियमेन, नैरन्तर्येण).**

एतत्पुरस्तात् etat-purastāt, *ind.* Eastward of this (not in front). **पुरस्तादग्रत इति व्याख्यानं न युक्तं. अग्रतः शक्रचापं तु न शोभनफलप्रदम्।** "But Indra's bow in front no auspicious fruit affords."

एतद् etad, 1 or 2 *c. sin. n.* of **एतद्** etad, *pron.* This.

एतस्मात् etasmāt, 5 *c. sin. n.* of **एतद्** etad, *pron.* This. **(पूर्वोक्तनिर्दिष्टात्, पूर्वोक्तात्, अभिज्ञानदानात्).**

एतान् etān, 2 *c. pl. m.* of **एतद्** etad, *pron.* This.

एतौ etau, 2 *c. du. m.* of **एतद्** etad, *pron.* This.

एत्य etya, *ind. p.p.* (of **इ** i, Go, with **आ** ā) Having come. Having met, found, obtained **(आगत्य, प्राप्य).**

एनम् enam, 2 *c. sin. m.* of **एतद्** etad, *pron.* This.

एनाम् enām, 2 *c. sin. f.* of **एतद्** etad, *pron.* This.

एभिः ebhih, 3 *c. pl. m.* or *n.* of **इदम्** idam, *pron.* This.

एव eva, *ind.* Indeed, verily, truly. Likewise, also. Even, very, self-same. Alone, only **(केवलं).**

एवम् evam, *ind.* So, in like manner; thus, in this manner **(पूर्वोक्तरीत्या** "in the aforesaid fashion").

एषु eshu, 7 *c. pl. m.* or *n.* of **इदम्** idam, *pron.* This.

एष्यति eshyati, 2 *fut. par.* of **इ** i, Go; attain **(गमिष्यति, प्राप्स्यति).**

ऐ ai, as in "aisle," "aye," "eye."

ऐरावत airāvata, *s.n.* Name of Indra's elephant. **ऐरावतस्थ** 6 *c. sin.* **(स्वर्गराजगजस्थ).**

ओ o, as in "bore," "stone."

ओघ ogha, *s.m.* Stream, flow. **ओघः** 1 *c. sin.*

ओष्ठ oshṭha, *s.m.* The lip, especially the upper.

औ au, as in "now," "hour."

औत्सुक्य autsukya, *abs. s.n.* Perturbation, extreme uneasiness, fidget. **औत्सुक्यात्** 5 *c. sin.* **(उत्कण्ठापर्याकुलत्वात्** utkaṇṭhā-paryākulatwāt, **उत्कण्ठितत्वात्, उन्मनस्कत्वात्, उन्मनस्कात्).** It is said: **निद्रानाशस्तथा चिन्ता भ्रान्तिश्चोत्सुकचेतसां।** "Loss of sleep, care, and bewilderment (is the sad lot) of those of anxious minds."

क k, as in "key."

कः kah, 1 *c. sin. m.* of **किम्** Who? which? what?

ककुभ kakubha, *s.m.* A kind of timber-tree of which boats are built (Pentaptera Arjuna).

ककुभसुरभौ kakubha-surabhau, **अर्जुनपुष्पसुगन्धौ (मेघागमे** "At the advent of the rainy season").

कच्चित् kachchit, *ind.* Assuredly, certainly. Also a particle of kind, gentle, bland, and courteous inquiry **(कोमलप्रश्ने** komala praśne).

कच्छ kachchha, *s.m.* Marshy ground, a marsh, a morass. Ground bordering water or watery soil, as the bank of a river, the margin of a lake or tank, mound or causeway.

कटाक्ष kaṭāksha, *s.m.* A glance, a leer. **कटाक्षान्** 2 *c. pl.* **(लोचनान्तविलोकितानि** lochanānta-vilokitāni, "Glances through the corner of the eye").

कठिन kaṭhina, *adj.* Hard, stiff, unpliant, crisp.

कठिनविषमाम् kaṭhina-vishamām, **कठोरनिम्नोन्नतां** kaṭhora-nimnonnatām.—**जटीभूतां बद्धत्वेन** "Become matted through being confined—" **(त्वगिन्द्रियक्लेशकारिणीम्).**

कण kaṇa, *s.m.* A drop. **कणैः** 3 *c. pl.*

कणिका kaṇikā, *s.f.* A droplet; an atom.

कण्ठ kaṇṭha, *s.m.* or *n.* The neck, the throat.

कण्ठच्छविः kaṇṭha-chchhavih, **कण्ठस्य द्युतिरिति कृत्वा** kaṇṭhasya dyutir iti kṛitwā, "Thus saying."

कण्ठच्युतभुजलतान्थि kaṇṭha-chyuta-bhuja-latā-granthi, **कण्ठात् (गलात्) च्युतः (स्रस्तः** or **स्खलितौ) भुजलतयोर्ग्रन्थिर् (बन्धनम्, अन्योन्यमिलनं) यत्र तत्—आश्लेषविच्छेदो मा भवतु.**

कण्ठलग्ना kaṇṭha-lagnā, **कण्ठासक्ता** kaṇṭhāsaktā.

कण्ठाश्लेषप्रणयिनि kaṇṭhāśleṣha-praṇayini **(कण्ठालिङ्गितार्थिनि** kaṇṭhālingitārthini, **कण्ठालिङ्गनप्रार्थनावति** kaṇṭhālingana-prārthanāvati, **कण्ठस्याश्लेषानुरागिनि जने व्यवहिते).**

कतिचित् katichit, 2 *c. pl. common gender, pronom.* A few, several. **कतिचिन्मासान्** A few months. "The number [is] not stated; eight months, however, are to be understood" **(सङ्ख्या नाभिहिता तथापि चाष्टौ मासा बोद्धव्याः).** See verse 110.

कतिपय katipaya, How many? So many, several.

कतिपयदिनस्थायिहंसाः katipaya-dina-sthāyi-hansāh, **कतिपयानि दिनानि (अल्पदिनं** or **अल्पदिवसं) स्थायिनः (स्थितिशीलाः** or **स्थातुं शीलं येषाम्) एवं**

हंसाः येषु ते तथा. The reason assigned for the lingering of the swans is "in order to feed on the rose-apple" (जम्बुफलभोगार्थं).

कथञ्चित् kathañchit, Somehow or other, by some means; by any means; with difficulty (तात्पर्यातिशयेन, महता कष्टेन).

कथम् katham, *ind.* How? in what manner (केन प्रकारेण)?

कथमपि kathamapi, *ind.* Somehow or other, with difficulty (केनापि प्रकारेण, महाकृच्छ्रेण, महता कष्टेन, महता प्रयत्नेन, गरीयसा प्रयत्नेन, अतिदुःखेन, कष्टसृष्ट्या—विरहिणामुन्माद्कत्वात् "From the excitement of lovers parted").

कथयत् kathayat, *pres. p. par.* of कथ, 10 *cl.* Say, tell, declare, explain, describe. कथयतः 6 *c. sin. m.*

कथयितुम् kathayitum, *inf.* (of कथ kath, 10 *cl.*) To speak, tell (वक्तुम्, भणितुम्).

कथा katha, *s.f.* Talk, discourse, conversation. Story, history.

कथित kathita, *p.p.* (of कथ kath) Told, related, mentioned, spoken, said, declared; confessed, owned. कथिते 7 *c. sin. m.* कथिताम् 2 *c. sin. f.* कथितम् 1 *c. sin. n.* (उक्तम्).

कदम्ब kadamba, *s.m.* Name of a plant (Nauclea Kadamba). कदम्बैः 3 *c. pl.*

"The Kadamba-flower, when full blown, is invested with projecting antheræ, like the erect bristles of a hedgehog. Delight, according to the Hindus, gives a bristling elevation to the down of the body. Speaking of the Kadamba or Nīpa, Sir W. Jones declares it to be the most elegant among Indian trees, in the opinion of all who have seen it, and one of the holiest among them, in the opinion of the Hindus. It may justly be celebrated amongst the beauties of summer, when the multitude of aggregate flowers, each consisting of a common receptacle perfectly globular, and covered uniformly with gold-coloured florets, from which the white thread-form styles conspicuously emerge, exhibits a rich and singular appearance on the branchy trees, decked with foliage charmingly verdant. The flowers have an odour, very agreeable in the open air, which the ancient Indians compared to the scent of new wine; and hence they call the plant Hali-priya, as beloved by Halin, that is, by the third Rāma, who was evidently the Bacchus of India."

कदल kadala, *s.m.* The plantain-tree.

कदलस्तम्भ kadala-stambha, *s.m.* The stem of the plantain-tree (to which, from its smooth, tapering form, the thigh of a woman has been compared).

कदली kadalī, *s.f.* The plantain-tree (रम्भा rambhā).

कनक kanaka, *s.n.* Gold.

कनककदलीवेष्टनः kanaka-kadalī-veshṭanah, सुवर्णवर्णरम्भानां suvarṇa-varṇa-rambhānām वेष्टनम् veshṭanam (आवरणं, चतुर्दिगवस्थानं chatur-dig-avasthānam), यत्र yatra.

कनककदलीस्तम्भगौरः kanaka-kadalī-stambha-gaurah, रसयुक्तरामकदलीप्रकाण्डवद् गौरः (पाण्डुरः, पीतवर्णः).—वस्त्रावृतत्वादीषत्पाण्डुरः "Palish from being veiled with muslin."

कनकनलिनैः kanaka-nalinaih (स्वर्णपद्मैः, कनककमलैः).

कनकनिकष kanaka-nikasha, *s.m.* The touch-stone for testing the purity of gold.

कनकनिकषच्छायया kanaka-nikasha-chchhāyayā, कनकघर्षणपाषाणरेखया इव कान्तिर्यस्याः सा तथा तया—सुवर्णरेखामण्डितज्ञानमनोज्ञतया suvarṇa-rekhā-maṇḍita-śāna-manogyatayā. कनकपरीक्षार्थं पाषाणविशेषे कृतस्वर्णरेखा कान्तितुल्यया. अनेन तवातिपुण्यं भावि, or विद्युतो ऽस्त्वं ध्वनितं—महती विद्युद् अभिसारिकाणां भयहेतुः "Great lightning is a cause of dread to females going to meet their lovers at night."

कनकनिकषवत् kanaka-nikashavat, कनकपरीक्षार्थं पाषाणविशेषे कृतस्वर्णरेखावत्.

कनकवलयभ्रंशरिक्तप्रकोष्ठः kanaka-valaya-bhraṅśa-rikta-prakoshṭhah, कनकवलयस्य (कनकवलययोः or स्वर्णकटकयोर्) भ्रंशेन (पातेन or अधः पतेन) रिक्तः (or रिक्तौ) प्रकोष्ठः (कूर्परादधः प्रदेशः or प्रकोष्ठौ) यस्य स तथा.—कनकपातेन शून्यबाहुः.—एतेन विरहात् दुर्बलत्वं (विह्वलत्वं) भूषणे ऽनादरश्च सूचितम् "Hereby weakness, from separation, and indifference to ornament is denoted." Bharata says:

स्मरानलकृशे काये भूषां न बहु मन्यते।

"On the body being emaciated by the flames of Love, one bestows not much thought on ornament."

कन्दर kandara, *s.m. n.* A cave, cavern. कन्दरेषु 7 *c. pl.* (दरीषु, गुहागर्तेषु, गुहासु).

कन्दली kandalī, *s.f.* A sort of tree, the banana (तृणभेद, तृणविशेष—गजभक्ष्यतृणविशेष "A kind of herbage, food for elephants"). कन्दलीः 2 *c. pl.*

कन्या kanyā, *s.f.* A daughter, maiden, damsel, girl. कन्याम् 2 *c. sin.*

कपाल kapāla, *s.m. n.* A skull, cranium.

कपिश kapiśa, *adj.* Brown, russet. कपिशम् 2 *c.sin.m.*

कपोल kapola, *s.m.* The cheek.

कमल kamala, *s.n.* A lotus. कमलम् 1 *c. sin.* कमलानि 2 *c. pl.*

कमलमुकुलैः kamala-mukulaih (पद्मकुट्मलैः padma-kuṭmalaih, पद्मपुष्पैः padma-pushpaih).

कमलवदन kamala-vadana, *s.n*, A lotus-face, *i.e.*, a lovely face. कमलवदनात् 5 *c. sin.* (पद्मरूपमुखात्). In this passage, खण्डितत्व is attributed to the Lotus, and नायकत्व to the Sun; the figure being called रूपक "metaphor."

कम्प kampa, *s.m.* Tremor. Flash, glare (of lightning).

कर kara, *s.m.* The hand. A ray of light; a beam of the sun or moon. An elephant's trunk. करेण 3 *c. sin.* करेषु 7 *c. pl.*

करका karakā, *s.f*, Hail.

करण karaṇa, *s.n.* An organ of sense. The body. करणैः 3 *c. pl.* करणेषु 7 *c. pl.*

करणविगमात् karaṇa-vigamāt, करणं (शरीरं) तस्य विगमो (ऽपायस) तस्मादूर्ध्वं—देहत्यागात्, देहत्यागं प्राप्य—यत्र कुत्रापि मरणात्—अन्यस्मिन् जन्मनि.

करधृतम् kara-dhṛitam (हस्तनिरुद्धं hasta-niruddham), अन्यापि नायिका नायकेन वसने ऽपनीते साकांक्षापि भुजाभ्यां तद्वलम्बने धारयति.

"Sachant qu' un peu de résistance,
Vaut mieux que trop de complaisance."

करराध् kara-rudh, *agt.* Ray-obstructing, hand-obstructor.. करराधि 7 *c. sin. m.* (रश्मिरोधके सति, किरणरोधके, किरणावरोधकारिणि सति, हस्तरोधिनि सति. — अतस्तन्मुखाश्रुमार्जनार्थप्रसारितं करं मा रुन्धि Therefore obstruct not the hand (ray or beam) outstretched to wipe the tear from off her face.

कररुह kara-ruha, *s.m.* A finger-nail.

कररुहपदैः kararuha-padaih, (नखचिह्नैः, नखव्रणरेखाभिः, नखक्षतैः, सुरतकालोचितैः, नखधाराङ्कितैः).

करिन् karin, *s.m.* An elephant.

करुणा karuṇā, *s.f*, Tenderness, pity, compassion.

करुणावृत्तिः karuṇā-vṛittih, करुणायां (कृपायां) वृत्तिः (प्रवर्तनं "A tendency") यस्य तादृशः—दयाशीलः, कृपाशीलः "Disposed to pity."

करोति karoti, *pres. par.* of कृ kṛi, 8 *cl.* Make, do (in verse 46) निवेशयति niveśayati, Inserts.

कर्ण karṇa, *s.m.* The ear. कर्णे 7 *c. sin.* (श्रवणे).

कर्णविभ्रंशिभिः karṇa-vibhraṁśibhih, कर्णेभ्यो विभ्रंशितैः (or पतितैः), श्रोत्रच्युतैः.

कर्तुम् kartum, *inf.* of कृ kṛi, 8 *cl.* Make (विधातुं चित्रयितुं, सम्पादयितुं).

कल kala, *s.m.* A low or soft sound, as humming, buzzing, etc. अव्यक्तमधुर "Indistinct and sweet."

कलत्र kalatra, *s.n.* A wife.

कलभ kalabha, *s.m.* A young elephant (गजबालक).

कलभतनुताम् kalabha-tanutām, कलभस्य (करिपोतस्य) तनुः (शरीरं) तस्य भावम्—करिपोतशरीरत्वं—करिशावप्रमाणदेहतां.

कला kalā, *s.f.* A sixteenth of the moon's diameter, a digit.

कलामात्रशेषाम् kalā-mātra-śeshām, कलामात्रं शेषो यत्र सा तथा—एककलावशिष्टां चन्द्रस्य.—कृष्णचतुर्दशीं "On the fourteenth night of the wane."

कल्प kalpa, *s.m.* One of the trees of Swarga.

कल्पन्ते kalpante, *pres. ātm.* of क्लृप klip, 1 *cl.* Be fitted or qualified. समर्था भवन्ति, सम्पद्यन्ते, योग्या भवन्ति.

कल्पवृक्षप्रसूतम् kalpa-vṛiksha-prasūtam, (देवद्रुमोत्पन्नं deva-drumotpannam, दुर्लभं "Scarce, rare."

कल्पवृक्षांशुकानि kalpa-vṛikshāṁśukāni, कल्पवृक्षाणाम् अंशुकानि, आतपाद्यभावार्थावरणवस्त्राणि.

कल्पित kalpita, *p.p.* (of क्लृप klip) Made, prepared.

कल्पितार्घाय kalpitārghāya, कल्पितो (निर्मितो) ऽर्घः (पूजाविधि) र्यस्मै—निर्मितार्घाय—दत्तार्घाय—सम्पादितपूजाविधये sampādita-pūjā-vidhaye.

कल्याण kalyāṇa (*fem.* -णी), *adj.* Happy, virtuous.

कल्याणि kalyāṇi, 8 *c. sin. f.* (मङ्गललक्षणोपेते—कल्याणभागिनि—सुभगे).

कश्चित् kaśchit, 1 *c. sin. m.* of किञ्चित् kiṁchit, *pron.* Some one. A certain. The Commentators declare that the reason for the suppression of the Yaksha's name is given in the following lines:

मित्रद्रोहं प्रकुर्वन्ति ये च विश्वासघातकाः।
तेषां नाम न कुर्वन्ति पद्यादौ च विशेषतः॥

"They mention not, and especially in verse, etc., the name of those who inflict injury on a friend, and are betrayers of confidence."

Again:

न नामग्रहणं कुर्यात् कृपणस्य गुरोस्तथा।
अभिशप्तस्य पत्न्याश्च मातापित्रोर्विशेषतः॥

"One should not mention the name of a miser, or of a spiritual teacher, of one lying under a curse, and of a wife; and particularly of a mother and father."

(स्वामिद्रोहित्वात् (or वञ्चकत्वात्) यक्षनामकीर्तनं न युक्तं).

कषाय kashāya, *adj.* Astringent. Fragrant. कषायः 1 *c. sin. m.*

कस्य kasya, 6 *c. sin. m.* of किम् *pron.* What? (कस्य जनस्य, कस्य जन्तोः, कस्य संसारिणः, कस्य पुरुषस्य).

कस्याञ्चित् kasyāṇchit, 7 *c. sin. f.* of किञ्चित् kiṇchit, *pronom.* Some, a certain (among the numerous edifices of the kind existing in Oogein).

काङ्क्षति kāṅkshati, *pres. par.* of काक्षि kāksh-i, 1 *cl.* Long for, desire (अभिलषति).

काञ्चन kāṇchana, *s.n.* Gold (सुवर्ण). *adj.* Golden, of gold. काञ्चनी kāṇchanī, 1 *c. sin. f.* (काञ्चननिर्मिता, स्वर्णनिर्मिता, कणकमयी, सौवर्णी, हिरण्मयी).

काञ्ची kāṇchī, *s.f.* A woman's zone or girdle. It is said:

काञ्च्यादिक्वणनं भङ्ग्या गमनं गाढदर्शनम्।
यूनः पुरो विदग्धाया मनोरागं प्रकाशयेत्॥

"The tinkling of the girdle, etc., the walk with a jaunty air, the display of the person before a youth, will reveal the soul's affection of a coquette."

कातर kātara, *adj.* Confused, disturbed, troubled, disordered, agitated, dispirited. कातरेण 3 *c. sin. n.* (व्याकुलेन, उत्कण्ठितेन).

कातरत्व kātaratwa, *s.n.* Perplexity, anxiety, dejection, despondency. कातरत्वम् 2 *c. sin.* (अधीरत्वं, अधैर्यं, व्याकुलत्वं).

कानन kānana, *s.n.* A forest, a grove, garden, lawn.

काननाम्रैः kānanāmraiḥ, (वनाम्रैः, वनाम्रवृक्षैः, वनचूतैः).

काननोडुम्बराणाम् kānanoḍumbarāṇām, (वनजन्तुफलानां, वनभवोडुम्बरवृक्षफलानां).

कान्त kānta (*p.p.* of कम) Loved, admired. Beautiful, elegant. A universal favourite. An inamorato; a husband. कान्तः 1 *c. sin. m.* (कमनीयः, चारुः, सकलजनकमनीयः).

कान्तो रतिगुणज्ञष्टो न जहाति यदन्तिकम्।
विचित्रविभ्रमासक्ता सा स्यात् स्वाधीनभर्तृका॥

"She [who] being wholly given up to various blandishments, whose society an inamorato allured by her skill in the arts of love never quits, is Swādhīna-bhartrikā."

कान्ता kāntā, *s.f.* A wife. A mistress. Any beloved or lovely woman. कान्तया 3 *c. sin.*

कान्तार *s. m. n.* A bad or difficult road. कान्तारे 7 *c. sin.*

कान्ताविरहगुरुणा kāntā-viraha-guruṇā, कान्ताविरहेण गुरुर् (दुःसहस्) तेन — कान्तायाः (स्वप्रेयस्या) विरहातिशयेन — कान्तायाः यो विरहो (विच्छेदस्) तेन गुरुणा (महता दुर्वहत्वात्).

कान्ति kānti, *s.f.* Beauty, splendour, lustre. कान्तिम् 2 *c. sin.* कान्तेः 6 *c. sin.*

रूपयौवनलावण्यैरुपभोगोपबृंहितैः।
अलङ्करणमङ्गानां कान्तिरित्यभिधीयते॥

"That graceful adornment of bodies with [elegance] of form, youth and beauty concentrated for enjoyment, is called 'Kānti' (loveliness)."

कान्तिमत् kāntimat, *adj.* Splendid, beauteous. कान्तिमत् 1 *c. sin. n.* (उत्कृष्टं, प्रशस्तशोभायुक्तं, सर्वोत्तमं).

कान्तोदन्तः kāntodantaḥ, कान्तस्य वार्ता (or वृत्तान्तः), वल्लभवार्ता. In the Guṇa-rasākara it is said:

ब्रह्मचारी वरो धीमान् मायाभिमानवर्ज्जितः।
धीरोऽप्युदारो निःशङ्को वक्ता भूतः स्त्रिया भवेत्।

"A religious student, a bridegroom, a man of sense, one exempt from guile and pride, grave, generous, unsuspecting, may hold converse with a female."

काम kāma, *s.m.* Passion, desire, love. कामात् 5 *c. sin.* Willingly, at pleasure (इच्छानुरूपात्, यदृच्छया, अनङ्गोद्रेकात्, शृङ्गारेच्छातः, रतिवाणातिशयात्).

कामचारिन् kāma-chārin, *agt.* Going, or who goes where he pleases. कामचारिन् 8 *c. sin.* (स्वेच्छया गामिन्, सर्वत्रेच्छया गमनसमर्थ, स्वतन्त्रविहारिन्).

कामपि kāmapi, 2 *c. sin. f.* of किमपि kimapi, *pron.* Some, a certain (स्त्रियं, सुन्दरीम्, कामिनीम्).

कामरूप kāma-rūpa, *adj.* Assuming any form at pleasure. कामरूपं 2 *c. sin. m.* (इच्छारूपधारिणं, इच्छागृहीतदेहं, स्वेच्छाधीनाकारं, इच्छाधीनविग्रहं, दुर्गादिसन्तरणक्षमं "able to cross defiles," etc.).

कामार्त kāmārta, *adj.* Love-sick. कामार्ताः 1 *c. pl. m.* (स्मरार्ताः, मन्मथपीडिताः, कामविह्वलाः, कन्दर्पपरवशाः मदनातुराजनाः कामान्धाः). Bharata says,

प्रदह्यमानः कामार्तो दूतीमग्रे नियोजयेत्।
कामदूतीं बुधाः प्राहुः कामावस्थानिवेदनात्॥

"One sick with love, being consumed, should despatch a female messenger into (her) presence. On account of making known the state of passion, sages call her Kāma-dūtī (love-messenger)."

कामिन् kāmin, *s.m.* A lover. An impassioned, amorous or wanton fellow. A fond and uxorious husband. कामी 1 *c. sin.* (रागी, कामुकः, कामातिशययुक्तः, स्ववनितासङ्गाभिलाषी सन्, व्यसनाभिभूतचित्तः).

कामिनी kāminī, *s.f.* A loving or affectionate woman; an amorous damsel, fond maiden. कामिनी 1 *c. sin.* कामिनीनाम् 6 *c. pl.* (अतिशयितकामानां, अभिसारिकाणां).

कामिलक्ष्येषु kāmi-lakshyeshu, कामिष्वेव शरण्येषु "Poor, miserable, helpless." कामिनं लक्ष्यं कृत्वा.

कामुकत्व kāmukatwa, *s.n.* Amorousness, lechery, lewdness. कामुकत्वस्य 6 *c. sin.* (कामितायाः, शृङ्गारित्वस्य, विलासितायाः, विलासित्वस्य, निर्लज्जत्वस्य, साहसिकत्वस्य).

कारण kāraṇa, *s.n.* Cause, reason.

कार्श्य kārśya, *s.n.* Leanness, emaciation. कार्श्यम् 2 *c. sin.* (कृशत्वं, दौर्बल्यं, क्षीणता, वैवर्ण्यं, विरहदौर्बल्यं. Figuratively, स्वल्पजलता, अल्पजलत्वं "Scantiness of water").

काल kāla, *s.m.* Time, season. काले 7 *c. sin.* काले काले kāle kāle (वर्षे वर्षे "Year by year." प्रतिवर्षं, प्रतिप्रावृट्कालं or आगमनं).

कालिदास kālidāsa, *s.m.* The poet Kālidāsa (from काली kālī, The goddess Durgā, and दास dāsa, A slave, the final of काली kālī being made short.

काव्य kāvya, *s.n.* A poem.

किंस्वित् kinswit, *ind.* Hey! What! Is it not? (ननु). किं kim is used in a question (प्रश्ने), स्वित् swit in doubt (वितर्के).

किञ्चित् kinchit, *pron. indef.* Something, somewhat, a little (ईषत् īshat).

किञ्चिदूनः kinchid-ūnah (अल्पहीनः, किञ्चित्स्तोकं, किञ्चिदल्पः, मङ्गलप्रायः, अत्यल्पन्यूनः).

कितव kitava, *s.m.* A rogue (used here as a term of endearment). कितव 8 *c. sin.* (धूर्त, वञ्चक).

किन्नरी kinnarī, *s.f.* A female kinnara or. chorister of Swarga. किन्नरीभिः 3 *c. pl.* (किम्पुरुषाङ्गनाभिः, देवतागायननारीभिः).

किमपि kimapi, *pron. indef.* Somewhat, a little, something indistinctly uttered.

किम्पुनर् kim punar, How much more! how therefore! (किमु What then? किं वाच्यं, किं वक्तव्यं Is it to be said? Can it be supposed? न वाच्यमेव Truly not be said. किं न स्यात् Should it not be? अत्यर्थं स्यात् It must be exceedingly. विरहिणां मेघदर्शनमुद्दीपनमित्यर्थः "The meaning is that the sight of clouds to those absent from home is inflammatory.")

किल kila, *ind.* Verily, assuredly. Probably, possibly, haply.

किशलय kiśalaya, *s. m. n.* A young shoot. A sprout or bud (to which the rosy lip of a mistress is compared by the poet). किशलयेषु 7 *c. pl.*

किशलयपुटान् kiśalaya-puṭān, पल्लवपुटान्, नवपल्लवकोरकान्.

कीचक kīchaka, *s.m.* A bambu whistling or rattling in the wind. Any hollow bambu, reed, or cane. कीचकाः 1 *c. pl.* (वेणवः, वेणुविशेषाः, सरन्ध्रवंशाः, सच्छिद्रवंशाः).

कीर्ति kīrti, *s.f.* Fame, renown, glory. कीर्तिम् 2 *c. sin.* (यशः—चर्मण्वत्याख्यां नदीं the river called Charmanvati (Chumbul), designated likewise as "Rantideva's glory." तत्कृतत्वात् शौक्लयोगात्—शुक्लजला हि या नदी प्रसिद्धिः.

कुञ्ज kunja, *s.m.* A bower, an arbour. कुञ्जे 7 *c. sin.* (लतागृहे latā-gṛihe).

कुटज kuṭaja, *s.m.* Name of a certain medicinal plant.

कुन्द kunda, *s.m. n.* A sort of jasmine.

कुन्दक्षेपानुगमधुकरश्रीजुषाम् kunda-kshepānuga-madhukara-śrījushām, कुन्दपुष्पानां क्षेपं (स्तवकम्) अनुगच्छन्ति ये मधुकराः (भ्रमरास्) तेषां श्रियं (शोभां) जुषन्ति (भजन्ति) यानि नानि तथा तेषां—कुन्दस्य (कुमुदस्य) यः क्षेप (उत्क्षेपणं) तस्यानुगा (-नुयायिनी) मधुकराः (भ्रमरास्) तेषां.

कुन्दसमानदन्ती kunda-samāna-dantī, *s.f.* A female whose teeth resemble the jasmine (in whiteness). कुन्दसमानदन्ति 8 *c. sin.*

कुपित kupita, *p.p.* (of कुप kup) Incensed, offended, angry, jealous. कुपिताम् 2 *c. sin. f.*

कुमुद kumuda, *s.n.* The white esculent water-lily. Kumuda seems to be a general name for beautiful aquatic flowers.

कुमुदविशदानि kumuda-viśadāni (कुमुदवद् विशदानि, कैरवत् शुभानि, अतिस्वच्छानि, धवलानि).

कुमुदविशदैः kumuda-viśadaih (मृणालवच्छुभ्रैः, निर्मलैः, अतिशुक्लैः).

कुरुवक kuruvaka, *s.m.* The crimson amaranth. कुरुवकम् 1 *c. sin. n.*

"Names of plants generally become neuter, to signify the produce of the plant; viz. it, blossoms and fruits: some add the root, and even the leaf."—COLEBROOKE'S *Translation of Amara Kosha.*

कुरुवकवृतेः kuruvaka-vṛiteḥ, कुरुवकेण वृतिर् (वेष्टनं प्राचीरं or आवर्तनं) यस्य तादृशस्य—स्वर्णझिण्टी-प्राचीरस्य.

कुरुष्व kurushwa, *imp. ātm.* of डु kṛi, 8 *cl.* Make.

कुर्वत् kurvat, *pres. p. par.* of डु kṛi, 8 *cl.* Do, make, perform. कुर्वन् kurvan, 1 *c. sin. m.* (सम्पादयन् भविष्यति वर्तमानप्रयोगः "The use of the present in [the sense of] the future").

कुर्वीथाः kurvīthāḥ, *pot. ātm.* of डु kṛi, 8 *cl.* Make.

कुल kula, *s.n.* A herd, flock of animals of the same species; bevy, covey. कुलैः 3 *c. pl.*

कुलिश kuliśa, *s.m. n.* A thunderbolt.

कुवलय kuvalaya, *s.n.* Any water lily. The blue lotus.

कुवलयदलप्रापि kuvalaya-dala-prāpi, कुवलयस्य (नीलोत्पलस्य) दलं (पत्रं) प्राप्नोतीति क्विप्—नीलोत्पलदलधारिणि, nilotpala-dala-dhāriṇi—कुवलयदलालङ्कारयोग्ये—इन्दीवरदलालङ्कार-शोभनशीले. प्रापि is the 7 *c.* of प्राप् and an epithet of कर्णे. Some of the Commentators, probably deeming it unfair that in the same sentence one noun should monopolize two attributives, whilst another has none, understand the word प्रापि as the neuter of प्रापिन्, and an epithet of वर्हं. नीलोत्पलदलं प्राप्तुं (सदृशीकर्तुं) शीलं यस्य तत्तथा. कुवलयदलभाजि, कुवलयदलेन भाजत इति.

कुवलयरजोगन्धिभिः kuvalaya-rajo-gandhibhih, उत्पलपरागगन्धिभिः utpala-parāga-gandhibhih. इन्दीवरपरागसौरभसम्बन्धिभिः indīvara-parāga-saurabha-sambandhibhih. By imbibing the water of the Gandhavatī (so named from its aromatic perfume), and from beholding the gambols of the lasses in the stream, you will derive काम "pleasure;" and by a visit to the holy fane, धर्म "virtue."

कुश kuśa, *s.m.* Sacrificial grass.

"The leaves of this most celebrated grass are very long, with margins acutely sawed downwards, but smooth on other parts, even on the keels, and with long points, of which the extreme acuteness was proverbial among the Hindus. The Pandits often say of a very sharp-minded man, that his intellects are as acute as the point of a Kuśa-leaf."—Sir W. Jones' *Select Indian Plants.*

कुशल kuśala, *s.n.* Well-being, welfare, happiness; tidings of health. कुशलम् 2 *c. sin.* कुशलैः 3 *c. pl. adj.* Happy, well. Clever, eloquent. Expert, skilful.

कुशलिन् kuśalin, *adj.* Happy, well. कुशलिनम् 2 *c. sin. m.* (कल्याणवन्तम्, समाधियुक्तं).

कुसुम kusuma, *s.n.* A flower. कुसुमैः 3 *c. pl.* (कुसुमैः कूटजैः, गिरिमल्लिकापुष्पैः, गिरिमल्लिकाभिः "with mountain-jasmines").

कुसुमसदृशम् kusuma-sadṛiśam, पुष्पतुल्यम् सुकोमलत्वात् Like a flower from extreme delicacy.

कुसुमसुरभिषु kusuma-surabhishu, कुसुमैः सुगन्धिषु—परित्यक्तं माल्यादि गृहोपरि क्षिप्यते, तत्पुष्पप्रयोगात् सुरभिषु—क्रीडास्थलं (गृहं) हि प्रकीर्णपुष्पप्रकरं भवति. It is said:

वेश्मोज्ज्वलं खगं मृष्टं प्रकीर्णकुसुमोत्करम्।
क्रीडोपकरणैर्युक्तं पिण्डधूपमनोहरम्॥

"A splendid mansion, towering to the sky, sprinkled, strewed with heaps of flowers, furnished with the appliances of pastime, charming the senses by cakes and incense."

कुसुम्भ kusumbha, *s.n.* Safflower (Carthamus tinctorious.

कूजित kūjita, *s.n.* The cry of a bird, cooing. कूजितम् 2 *c. sin.* (रुतं).

कूट kūṭa, *s.m.* The peak of a mountain. A heap, quantity. कूटात् 5 *c. sin.*

कूटज kūṭa-ja, *s.m.* Name of a certain medicinal plant (as the name implies), growing on the summit of a mountain. कूटजैः 3 *c. pl.*

कृत kṛita, *p.p.* (of डु kṛi) Made, done, rendered. कृताम् 2 *c. sin. f.* कृतम् 1 *c. sin. n.*

कृतक kṛitaka, *adj.* Artificial, factitious. Adopted.

कृतकतनयः kṛitaka-tanayaḥ (कृत्रिमपुत्रः, पोष्यपुत्रः).

कृतवसतयः kṛita-vasatayaḥ, कृता वसतिर् (निवासो) यैस् ते (हंसाः)—विहितनिवासाः vihita-nivāsāḥ.

कृतान्त kṛitānta, *s.m.* Destiny, *i.e.*, the inevitable result of actions done in a past existence. कृतान्तः kṛitāntaḥ, 1 *c. sin.* (दैवं, विधिः).

कृत्त kṛitta, *p.p.* (of कृत kṛit) Cut, divided.

कृत्ति kṛitti, *s.f.* A hide, skin.

कृत्य kṛitya, *s.n.* Motive, cause. Doing, performance. कृत्यम् 1 *c. sin.*

कृत्या kṛityā, *s.f.* Action, act, doing, performance.

कृत्वा kṛitwā, *ind. p.p.* (of डु kṛi) Having made, done, performed, fulfilled, or accomplished (विधाय, सम्पाद्य).

कृपण kṛipaṇa, *adj.* Poor, indigent, deficient. कृपणाः 1 *c. pl. m.* (दीनाः, ज्ञानशून्याः)

कृषि kṛishi, *s.f.* Tillage, husbandry, agriculture, cultivation of the soil.

कृष्ण kṛishṇa, *adj.* Black or dark blue. कृष्णः 1 *c. sin. m.* (श्यामलः, बाह्यमलिनः).

कृष्णसार kṛishṇa-sāra, *s.m.* A kind of deer, the black antelope (हरिणविशेष). The principal or choicest orb (प्रकृष्टमण्डल), the eyeball (चक्षुर्गोलक).

कृष्णसारप्रभानाम् kṛishṇasāra-prabhānām, कृष्णसारस्य (चक्षुर्गोलकस्य) प्रभा (कान्तिर्) येषां ते तथा तेषां.

क्लृप्त klṛipta, *p.p.* (of क्लृप klṛip) Formed, fashioned; cut into patterns, pared into shapes.

क्लृप्तच्छेदैः klṛipta-chchhedaih, क्लृप्तं (विरचितं) छेदैः (खण्डैः, पत्रच्छेदैः, दलसञ्चयैः).

के ke, 1 *c. pl. m.* of किम् kim, *pron.* Who?

केका kekā, *s.f.* The cry of the peacock. केकाः 2 *c. pl.*

केतक ketaka, *s.m.* or केतकी ketakī, *s.f.* A fragrant plant (Pandanus odoratissimus). केतकैः ketakaih, 3 *c. pl.* (केतकीकुसुमैः). केतक एवारामरक्षार्थं हि क्रियते.

The Ketaka serves for a garden-fence (like the prickly pear in the southern countries of Europe). A print of the Ketaka is given in Sir W. Jones's "Treatise on the Select Plants of India.". The spikes are sharp at the points, and jagged like a saw. It bears a fruit, weighing twenty or thirty pounds, containing a farinaceous substance, both palatable and nutritive in a high degree. The scent of the Ketaka flowers is said to be very distressing to those absent from the object of their affection.

केतकाधानहेतोः ketakādhāna-hetoh, केतकीकुसुमानां (or केतकीपुष्पस्य) यद् आधानं (आरोपणं)—केतकीनां काष्ठस्वभावानां अचेतनानामपि—केतकगर्भारोपणकारणस्य,—केतकपुष्पोत्पत्तिकारणस्य. एतदागमनेनाप्राणिनो ऽपि गर्भाधानं जातम्.

"By the arrival thereof, the fructification even of inanimate objects takes place."

केश keśa, *s.m.* Hair. केशान् 2 *c. pl.* (कुन्तलान्).

केशग्रहणम् *s.n.* Seizure of the hair (केशबन्धनं, केशावलम्बनं), यथा काचिन्नायिका सपत्नीत्यसहमाना भर्तारं शिरोरत्नेन सह केशेष्वाकर्षति तद्वत्.

केशर keśara, *s.m.* Name of a tree bearing a white strong-smelling flower. The filament of any vegetable. केशरः 1 *c. sin.* केशरैः 3 *c. pl.*

The Keśara is one of the most beautiful trees on earth, and the delicious odour of its blossoms justly gives them a place in the quiver of Kāmadeva. In the poem called Naishadha, there is a wild, but elegant couplet, where the poet compares the white of the Nāga-Keśara, from which the bees were scattering the pollen of the numerous gold-coloured anthers, to an alabaster wheel, on which Kāma was whetting his arrows, whilst sparks of fire were dispersed in every direction.—Sir W. Jones *on Select Indian Plants.*"

केशव keśava, *s.m.* A name of Vishṇu or Krishṇa (as having fine hair).

केशसंस्कारधूपैः keśa-sanskāra-dhūpaih, केशानां (चिकुराणां) संस्काराय अगुरुधूमैः—तत्र्य (or तत्रेत्य) नारीभिः केशसंस्काराय प्रज्वलितधूपधूमैः—कवरीकलाधिवासनधूपधूमैः kavarī-kalādhivāsana-dhūpa-dhūmaih.

कैलास kailāsa, *s.m.* The mountain Kailāsa. कैलासात् 5 *c. sin.* कैलासस्य 6 *c. sin.*

कोटर koṭara, *s.m. n.* The hollow of a tree. कोटरेषु 7 *c. pl.*

कोमल komala, *adj.* Soft, delicate. कोमलम् 2 *c. sin. n.* Some read पेलवम्; others पेशलम्.

कोविद kovida, *adj.* Learned, wise, clever, knowing.

कौतूहल kautūhala, *s.n.* Curiosity, eager desire. कौतुहलानाम् 6 *c. pl.*

कौरव kaurava, *adj.* Related to, or named after Kuru, the common ancestor of the sons of Pāṇḍu and Dhṛitarāshtra. कौरवम् 2 *c. sin. n.* (कुरुसम्बन्धि, तत्कृष्णसहायार्जुनविजयास्पदं tat kṛishṇa-sahāyārjuna-vijayāspadam).

कौलीन kaulīna, *s.n.* Evil report, detraction. कौलीनात् 5 *c. sin.* (जनापवादात्, लोकप्रवादात्)—एतावता कालेन परासुनो वेदा गच्छन्ति इति.

"In the course of so long a time, feelings for any one deceased die away."

यावदतिदूरे वासस् तावदतिदूरे स्नेहः "Out of sight, out of mind." स्नेहाः प्रवासाश्रयान्नश्यन्ति.

क्रम krama, *s.m.* Order, method, progress, course. क्रमेण krameṇa, 3 *c. sin.*

क्रिया kriyā, *s.f.* A doing, performance.

क्रीडा krīḍā, *s.f.* Play, sport, gambol, pastime, game.

क्रीडालोलाः krīḍā-lolāh, (खेलातत्पराः, कौतुकचञ्चलाः, कीडायामपि लोलाः—स्वहृदयकल्पितेन भयेन चञ्चलाः).

क्रीडाशैल krīḍā-śaila, *s.m.* A mountain for play, sport, pastime, or recreation. क्रीडाशैलः 1 *c. sin.* (विहारगिरिः) क्रीडाशैले 7 *c. sin.* (केलिपर्वते, लीलापर्वते, हिमालयमध्यवर्तिनि भूतोच्चप्रदेशे).

क्रूर krūra, *adj.* Cruel, pitiless, unrelenting. क्रूरः 1 *c. sin. m.* (सापकर्मा injurious, दारुणः cruel, निर्दयः ruthless, परसौभाग्यदर्शनाचमत्वेन खलः).

क्रोध krodha, *s.m.* Anger, wrath, ire. क्रोधेन 3 *c. sin.*

क्रौञ्च krauncha, *s.m.* A kind of heron (Ardea jaculator).

क्रौञ्चरन्ध्र krauncha-randhra, *s.n.* Name of a certain pass amongst the mountains. क्रौञ्चस्य (क्रौञ्चनाम्नः) पर्वतस्य रन्ध्रं.

क्लान्त klānta, *p.p.* (of क्लम) Fatigued, wearied, jaded, aching. Faded, drooping. क्लान्तम् 2 *c. sin. m.*

क्लान्तकर्णोत्पलानां klānta-karṇotpalānām, क्लान्तानि (व्याकुलानि, मलिनानि) कर्णयोरुत्पलानि (अवतंसीकृतानि कुवलयानि) येषां (मुखानां)—क्लान्तीभूतश्रवणभूषणेन्दीवराणां klāntibhūta-śravaṇabhūshaṇendivarāṇām,

क्लान्तहस्ताः klānta-hastāh, खिन्नो हस्तो यासां तास्तथा—व्यथितहस्ताः, खिन्नहस्ताः—अनेन तासां सौकुमार्यं सूचितं. सौकुमार्यध्वनिरयं.

क्लिष्ट klishṭa, *p.p.* (of क्लिश् kliś) Distressed, pained, hurt. Chafed, fretted. Impaired, obscured, bedimmed. क्लिष्टाम् 2 *c, sin. f.*

क्लिष्टकान्तेः klishṭa-kānteh, क्लिष्टा (ध्वस्ता, उपतप्ता, अदृश्या, कदर्थिता) कान्तिः (शोभा or द्युतिः) यस्य तादृशस्य.

क्लेशिन् kleśin, *agt.* Paining, scorching, withering, blasting. क्लेशिना 3 *c. sin.m.*

क्व kwa, Where? क्वासौ मेघः क्व सन्देशार्थाः Where is the cloud? Where is the message? क्व अनयोः सम्बन्धः Where is the connexion of these two? अत्यन्तासम्भवे क्वद्वयं प्रयुज्यते In what is exceedingly improbable, a couple of interrogative particles is employed. ननु मेघो ऽचेतनः कथं वार्ताहारक इति अयुक्तिमन्नाम दूषणमिदम् "Is not a cloud unconscious? how can it be a conveyer of intelligence?" This is indeed a blemish involving an absurdity. For it has been said:

यत्तु युक्तिविरुद्धं तदयुक्तमिदिति स्मृतम् ।
दूता यथेन्दुजलदमारुतभ्रमरादयः ॥

"Whatever is repugnant to propriety is deemed absurd, as the moon, a cloud, the wind, bees, etc. (employed or represented as) messengers."

This is called विषमालङ्कारः "A rhetorical figure of unusual or incompatible cause and effect."

क्वचित् kwachit, *ind.* Anywhere (लोकत्रये).

क्वचिदपि kwachid api, Anywhere. For an instant (काले स्थाने च In time and place).

क्वणित kwaṇita, *p.p.* (of क्वण) Sounded; jingling, tinkling, rattling (शब्दित).

क्षण kshaṇa, *s.m.* A moment; a short while, a little time. A measure of time equal to four minutes. क्षणम् adverbially, For a moment. As a moment.

क्षणपरिचितः kshaṇa-parichitah, क्षणं (मुहूर्तं) परिचितः (प्रियः सन्, प्राप्तपरिचयः, प्रीतिजनकत्वेनावलोकितः सन्, प्राप्तसुहृद्भावः सन्)—मुहूर्तं परिज्ञातः—क्षणं संसृष्टः सन् न तु चिरं.

क्षणमुखपटप्रीतिम् kshaṇa-mukha-paṭa-prītim, क्षणम् (अल्पकालं or कियत्कालं व्याप्य) तन्निश्वसितेन उत्तप्तस्य तन्मुखाच्छादकवस्त्रस्य प्रीतिं कुर्वन्.

क्षत्र kshatra, *s.m.* A man of the second, or military or regal class.

क्षत्रप्रधनपिशुनम् kshatra-pradhana-piśunam, क्षत्राणां (क्षत्रियाणां भीष्मादीनां) प्रबलस्य युधस्य सूचकं—सङ्ग्रामख्यापकं—अद्यापि शिरःकपालबाहुल्यात् पाण्डवयुद्धसूचकमित्यर्थः ।

"Indicative of the battle of the Pāṇḍavas, from the multitude of heads and skulls found even at this day."

क्षपयति kshapayati, *pres. par.* of क्षै kshai, *caus. form*, Destroy, kill.

क्षपा kshapā, *s.f.* Night. क्षपासु 7 *c. pl.* (रात्रिषु).

क्षम kshama, *adj* Able, adequate, competent.

क्षय kshaya, *s.m.* Loss, waste, destruction.

क्षयित kshayita, *adj.* Wasted, consumed (दग्ध).

क्षयिन् kshayin, *adj.* Frail, perishable, subject to decay. क्षयिषु 7 *c. pl. n.* (नश्वरेषु, विनाशिषु).

क्षाम kshāma, *p.p. irreg.* (of क्षै kshai) Wasted, emaciated. Slender. क्षामा 1 *c. sin.f.* क्षामाम् 2 *c.*

क्षिणोति kshiṇoti, *pres. par.* of क्षि kshi, 5 *cl.* Wound, hurt, pain (पीडयति).

क्षिप्त kshipta, *p.p.* (of क्षिप) Scattered, driven about.

क्षीण kshīṇa, *p.p.* (of क्षी kshī) Wasted, diminished, exhausted, shrunk. क्षीणः 1 *c. sin. m.* आधिक्ये द्वित्वं "The repetition is for excess." (वर्षणेन क्षशः, क्षशःसन्—तृष्णादिना तिक्षशः—पिपासितःसन्—तृषितः सन्).

क्षीर kshīra, *s.n.* Milk. क्षीरम् 1 *c. sin.*

क्षुद्र kshudra, *adj.* Little, small. Mean, low. क्षुद्रः 1 *c. sin. m.* (अधमः, नीचः, कृपणः, स्वल्पः, अल्पीयान्).

क्षेत्र kshetra, *s.n.* A field (शैलप्रान्तमुन्नतस्थलं "Upland ground skirting a mountain"). क्षेत्रम् 1 or 2 *c. sin.*

क्षेप kshepa, *s.m.* A throwing; a delaying, loitering or passing away (of time). A clump of flowers. क्षेपम् 2 *c. sin.* (कालविलम्बम्).

क्षेमतर kshematara, *compar.* (of क्षेम Happy, well) Happier, better. क्षेमतरम् 1 *c. sin. n.*

क्षोभ kshobha, *s.m.* Agitation, shaking, tossing about.

ख kha, as in "inkhorn," "brick-house."

ख kha, *s.n.* Heaven, sky, air. खम् 2 *c. sin.* खे 7 *c. sin.* (आकाशे, व्योम्नि).

खग kha-ga, *s.m.* A bird (sky-goer). खगाः 1 *c. pl.*

खचित khachita, *p.p.* (of खच्) Set, inlaid; adorned, mounted (मिश्रित Blended, mingled).

खण्ड khaṇḍa, *s.n.* A part, portion, piece. खण्डम् 1 *c. sin.* (शकलं).

खण्डिता khaṇḍitā. *s.f.* A woman whose husband or lover has been guilty of unfaithfulness. खण्डितानाम् 6 *c. pl.* (प्रियवञ्चितानाम्).

It is said:

अन्यत्र सकलां रात्रिं नीत्वा यस्याः सुहृज्जनः।
प्रातरायाति सा ज्ञेया खण्डिता नायिका इति॥

"The mistress whose lover having passed the whole night elsewhere, comes betimes in the morning, is to be considered a 'Khaṇḍitā.'"

खद्योत kha-dyota, *s.m.* A fire-fly (from ख Sky, and द्योत *Illuminating*).

खद्योतालीविलसितनिभाम् khadyotālī-vilasita-nibhām. खद्योतानाम् आली (श्रेणी) तस्या विलसितं तन्निभां (तदनुकाराम् तत्सदृसीं, तद्वत् शोभमानां वा)—दक्षिणपङ्क्तिविलासतुल्याम्.

खलु khalu, *ind.* Indeed, certainly, surely. Haply, probably, it may be. Since, for, because. Sometimes pleonastic.

खिन्न khinna, *p.p.* (of खिद् khid) Wearied, jaded, distressed, exhausted. खिन्नः 1 *c. sin. m.* (अतिक्लान्तः सन्, अध्वश्रमेण क्लान्तः सन्, भोक्तुं क्षीणबलः सन्, अतिश्रान्तः). *It has been said:*

पथि विश्राम्य गन्तव्यं विश्रमाज्जायते बलं।

"*Having reposed on the road one should proceed; from repose arises strength.*"

खिन्नविद्युत्कलत्रः khinna-vidyut-kalatrah, खिन्नं (क्षीणं or अवसन्नं), विद्युदेव (or विद्युद्रूपं) कलत्रं (पत्नी) यस्य सः or तादृशो (भवान्).

खेद kheda, *s.m.* Weariness, exhaustion. Sorrow, affliction, distress. खेदम् 2 *c. sin.* (आयासम्, अध्वश्रमं, श्रमम्). खेदात् 5 *c. sin.* (अधिकोद्वेगात्, विरहदाहात्).

ग ga, as in "give," "gun," "peg."

गगन gagana, *s.n.* (also written गगण gagaṇa) Sky.

गगनगतयः gagana-gatayah, गगने गतिर्येषां ते गगनगतयः (नभश्चराः, नभोगामिनः, खेचराः, देवविद्याधराद्यः, गन्धर्वसिद्धाद्यः, वैमानिका देवाद्यः).

गङ्गा gaṅgā, *s.f.* The Ganges.

गङ्गादुकूल gaṅgā-dukūla, Ganges-vesture. (This form of speech is termed उपमितसमास upamita-samāsa, "A compound of comparison").

गङ्गासागर gaṅgā-sāgara, *s.m.* Gangā sāgar (name of a place).

गच्छत् gachchhat, *pres. p. par.* of गम gam, 1 *cl.* Go, pass. गच्छत्सु 7 *c. pl. m.* गच्छन्तीनाम् 6 *c. pl. f.* (यान्तीनाम्, कृततामसाभिसाराणाम् "Making visits in the dark.")

गच्छति gachchhati, *pres. par.* of गम gam, 1 *cl.* Go.

गच्छेः gachchheh, *pot. par.* of गम gam, 1 *cl.* Go (यास्यति, गमनं कुर्याः, यायाः, व्रज).

गज gaja, *s.m.* An elephant. गजः 1 *c. sin.* गजस्य 6 *c. sin.* (हस्तिनः). अत्रोपमा "Here is a simile." गजस्य (हस्तिनो) ऽङ्गे (ऽवयवे) भक्तिच्छेदैः (विभागभेदैः रेखाविशेषैः) विरचितां (हस्तिपकादिभिः "By elephant-drivers, etc.," कृतां) भूतिं (शोभासम्पदम्) इव नदीमित्यर्थः। विन्ध्यपादस्य गजतुल्यत्वं वक्रगतायां नद्यां रेखातुल्यत्वम्.

गण gaṇa, *s.m.* A troop of inferior deities, considered as Śiva's attendants, and under the especial superintendence of Gaṇeśa. गणैः 3 *c. pl.* (शङ्करपार्श्वदैः, नन्दिप्रभृतिभिः, प्रमुखैर्नन्दिभृङ्ग्यादिभिः, प्रथम (or प्रमुख) गणैः).

गणना gaṇanā, *s.f.* Counting, numbering, enumeration (सङ्ख्यान). गणनया 3 *c. sin.* (परिसङ्ख्यया, एक द्वि त्रि क्रमेण).

गण्ड gaṇḍa, *s.m.* A cheek, especially the whole side of the face, including the temple.

गण्डच्छायम् gaṇḍa-chchhāyam, कपोलकान्तिं, वदनशोभां, मुखकान्तिं, कपोलस्थलशोभां.

गण्डस्वेदापनयनरुजा gaṇḍa-swedāpanayana-rujā, गण्डस्य (कपोलायाः) स्वेदस्य (घर्मजलस्य) अपनयनाय (नाशाय) या रुक् (हस्तवस्त्राञ्चलजनिता पीडा) तया—करादिना आमर्दनं—स्वेदप्रोञ्छणं कुर्वन्ति.

गण्डाभोगात् gaṇḍābhogāt, गण्डमण्डलात्, गण्डस्थलात्, कपोलमण्डलात्, कपोलविस्तारात्, कपोलफलकात्.

गत gata, *p.p.* (of गम gam) Gone. Resorted, repaired. Turned. गतः 1 *c.sin.m.* गतम् 2 *c.sin.m.n.* गते 7 *c. sin. m.* गतानाम् 6 *c. pl.*

गति gati, *s.f.* A going; motion, march, progress. Course of events. Refuge, asylum. गतिः 1 *c. sin.* गत्या 3 *c. sin.* गतयः 1 *c. pl.*

गत्युत्कम्पात् gatyutkampāt, गतौ च उत्कम्प (उत्फालनं शीघ्रता वा) तस्माद्धेतोः "From that cause."

गत्वा gatwā, *ind. p.p.* of गम gam, Go (प्राप्य).

गन्तव्य gantavya, *fut. p.p.* (of गम gam) To be gone to, about to be visited. गन्तव्या 1 *c. sin. f.*

गन्तासि gantāsi, 1 *fut. par.* of गम Go (गमिष्यसि, यास्यसि).

गन्तुम् gantum, To go, *inf.* of गम gam.

गन्ध gandha, *s.m.* Smell, scent, odour, perfume, aroma. गन्धम् 2 *c. sin.* गन्धैः 3 *c. pl.*

गन्धवती gandhavatī, *s.f.* Name of a river (so-called from its fragrance). गन्धवत्याः 6 *c. sin.*

गन्धिन् gandhin, *adj.* Fragrant, scented, perfumed. गन्धिभिः 3 *c. pl. m.* (उत्पलयोगेन युवतिस्नानेन च वायोः सौगन्ध्यं).

गमः gamah (after मा mā) 3 *pret. par.* of गम gam, Go (मा गाः, मा याहि).

गमन gamana, *s.n.* A going in general, moving, walking; departure.

गमय gamaya, *imp.* of गम gam, Go, *caus. form* (अतिवाहय, धैर्येणातिवाहय, अतिक्रमय).

गमित gamita, *p.p.* (of गम gam, *caus. form*) Made to go, sent, dismissed (प्रापित).

गम्भीर gambhīra, *adj.* Deep, profound. Deep, bass (as sound). गम्भीरायाः 6 *c. sin. f.*

गम्भीरा gambhīrā, *s.f.* Name of a river; also the epithet of any female who suppresses and conceals both her anger and satisfaction (गूढरोषतोषस्त्रीविशेषस्य), and is nearly synonymous with मानिनी. गम्भीरायाः 6 *c. sin.* Bharata thus defines गाम्भीर्य gāmbhīrya, "Depth."

विक्रियाः सहजा यत्र हर्षोत्कर्षभयादिषु ।
भावेषु नोपलभ्यन्ते तद् गाम्भीर्यमुदाहृतम् ॥

"Wherever changes in the feelings, arising simultaneously through excess of joy, fear, etc., are not to be detected, the same is called Gāmbhīrya."

It is said:

आकारेणात्मनो भावं या नारी प्राक् प्रकाशयेत् ।
क्षिप्रमेवाभियोज्या सा प्रथमे चापि दर्शने ॥

"The woman who should manifest the feeling of her soul early by an outward sign, may be accosted very speedily, even at first sight."

गम्य gamya, *fut. p.p.* (of गम gam, Go) To be gone to. गम्यम् 2 *c. sin. n.* (अनुमेय To be inferred, परिच्छेद्य To be discriminated).

गर्जित garjita, *s.n.* The muttering of clouds, the rumbling or rolling of distant thunder. गर्जितम् 2 *c. sin.* गर्जितैः 3 *c. pl.* गर्जितानाम् 6 *c. pl.*

गर्भ garbha, *s.m.* Fœtus, embryo (कुक्षिस्थो जन्तुः).

गर्भाधान garbhādhāna, *s.n.* Fructification, impregnation.

गर्भाधानक्षमपरिचयम् garbhādhāna-kshama-parichayam, गर्भस्याधाने (गर्भार्पणे or गर्भारोपणे) योग्यः (समर्थः) परिचयो (दर्शनं or सम्भोगः) यस्य तादृशं—घनागमे हि प्रतिवर्षं बलाकानां गर्भाधानं भवत्येव—मेघसमये हि बलाका गर्भिण्यो भवन्ति.

गर्व garva, *s.m.* Pride, arrogance. Kohana says:

गर्वो मानकुलैश्वर्यरूपविद्याबलादिभिः ।
इष्टान्नविषयोत्पत्तौ जायते नीचगोचरे ॥

"Pride arises in one of low propensities through homage paid, family rank, beauty, knowledge, might, etc.; from possession of delicate viands, and (such) objects."

गलित galita, *p.p.* (of गल gal) Fallen, dropped; moulted. गलितम् 2 *c. sin. n.* (शरीरात् स्वयं पतितं, नतु छिन्नं—भ्रष्टं).

गवाक्ष gavāksha, *s.m.* Air-hole, loop-hole; a round window, bull's-eye. गवाक्षे 7 *c. sin.* (वातायने).

गाङ्गतानाम् gāṅgatānām, भूमिगतानाम्, पृथिवीगतानां, पुनरपि भूलोकगतानाम्, पुनरपि चिरस्वर्गवासजनकसुकृतचरणार्थं.

"Again for the sake of performing good deeds, productive of a long residence in Swerga."

गाढ gāḍha, *adj.* Much, very, excessive. Heavy, oppressive. Firm, close.

गाढतप्तेन gāḍha-taptena, गाढम् (अत्यन्तं) तप्तेन (सन्तापयुक्तेन)—त्वद्विरहाग्निना सन्तप्तेन—एतेन स्वतापनाशार्थं.

गाढोत्कण्ठाम् gaḍhotkaṇṭhām, गाढा (प्रवृद्धा) कदा आयातीति उत्कण्ठा यस्यास् ताम्—बलविरहवेदनाम्.

गाढोपगूढम् gāḍhopagūḍham (दृढालिङ्गितं, गूढालिङ्गनं, निविडालिङ्गनम्).

गाढोष्णाभिः gāḍhoshṇābhih, गाढः (प्रचुर) उष्णो यासु तथा ताभिः— (तीव्रसन्तापाभिः, अतितीव्राभिः, अतिशयतापजनिकाभिः).

गाण्डीव gāṇḍīva, *s.m. n.* Name of Arjuna's celebrated bow.

गाण्डीवधन्वन् gāṇḍīva-dhanwan, *s.m.* Armed with (the bow) Gāṇḍīva, *i.e.* Arjuna. गाण्डीवधन्वा gāṇḍīva-dhanwā, 1 *c. sin.* (गाण्डीवं धनुर्यस्यासौ गाण्डीवधन्वा).

गात्र gatra, *s.n.* The body. गात्रम् 2 *c. sin.* (शरीरं, वपुः).

गाम् gām, 2 *c. sin.* of गो go, *s.f.* The earth (पृथिवीम्, भूमिम्).

गाहमान gāhamāna, *pres. p. ātm.* of गाह् gāh, 1 *cl.* Overspread, envelope, enshroud. गाहमानः 1 *c. sin. m.* (आलम्बमानः, समाक्रममाणः, सेवमानः, व्याप्नवन्, व्याप्नुवानः).

गिरि giri, *s.m.* A mountain. गिरिम् 2 *c. sin.*

गीयते gīyate, *pres. pass.* of गै gai, Sing.

गुण guṇa, *s.m.* Virtue, merit, skill. A string. गुणम् 2 *c. sin.*

गुणवत् guṇavat, *adj.* Amiable, virtuous. गुणवतिं 8 *c. sin. f.* (गुणाधिके, प्रशस्तगुणान्विते, ललितगन्धादिगुणशालिनि, मन्मनःसमाकर्षिगुणयुक्ते, सौभाग्यसौकुमार्यादिगुणसम्पन्ने).

गुणित guṇita, *p.p.* (of गुण guṇ) Multiplied (arithmetically); increased, grown. गुणितम् 2 *c. sin. m.*

गुरु guru, *adj.* Heavy, grave. Grievous, irksome, tedious. Oppressed, charged. Deep. गुरुणा 3 *c. sin. m.* (दुर्वहेण, दुःसहेन, दुर्भरेण, Hard to bear, difficult to endure). गुरुभिः 3 *c. pl. n.* गुरुषु 7 *c. pl. m. s.m.* Any venerable personage; a sire, lord. गुरोः 6 *c. sin.*

गुरुतर gurutara, *compar.* (of गुरु guru, Heavy) Heavier, sorer, more grievous.

गुरुतरशुचम् gurutara-śucham, गुरुतरा शुक् (शोको) यस्याः सा ताम्. अतिदुर्भरदुःखाम्, गाढशोकाम्, मदेकध्यानहृदयत्वात् नितान्तशोकाकुलाम्. Bharata says:

निद्राक्षेदो ऽङ्गदौर्बल्यं वर्णपाण्डुत्वमेव च।
सन्तापो दीर्घनिःश्वासः स्त्रीपुंसो विरहे समाः॥

"The loss of sleep, weakness of body, paleness of complexion, heat, and deep sighing—in woman and man are alike during separation."

गुह्यक guhyaka, *s.m.* A kind of demigod attendant upon Kuvera, the deity of wealth, and guardian of his treasures. गुह्यकाः 1 *c. sin.*

धनं रक्षन्ति ये यक्षास्ते स्मृगुह्यकसञ्ज्ञकाः।

"Those Yakshas who guard the treasure are designated Guhyakas."

गृह gṛiha, *s.n.* A house, mansion. A wife (गृहिणी gṛihiṇī, पत्नी). गृहात् 5 *c. sin.* It is said:

न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते।

"They say the house is not Gṛiha; the *mistress* of the house is called Gṛiha."

गृहबलिभुज् gṛiha-bali-bhuj, *s.m.* A crane, so called because, "during the rains, the males eat the offering given by their females;" वका हि वर्षासु निजस्त्रीदत्तं बलिं भुञ्जते. The word is also applicable to the sparrow, Chātaka, and crow. गृहबलिभुजाम् 6 *c. pl.* (वकपक्षिणां—गृहिणीदीयमानं बलिं भुक्त्वा.—गृहं गृहिणी तत्सम्बन्धिबलिं भुञ्जते).

गेय geya, *fut. p.p.* (of गै) To be sung. *s.n.* A song. गेयम् 2 *c. sin. n.* The Commentators have here rendered this word by the term रूपकं "A particular class of rhetorical or poetical figures, including various modes of poetical description, or the illustration and exhibition of visible things and persons."

गेहिनी gehinī, *s.f.* A wife. गेहिन्याः 6 *c. sin.*

गो go, *s.f.* The earth. गाम् 2 *c. sin.*

गोत्र gotra, *s.n.* Family, race, lineage.

गोप gopa, *s.m.* A herdsman, a cowherd.

गोपवेषस्य gopa-veshasya. (गोपालवेशधारिणः gopāla-veśa-dhāriṇaḥ, "Wearing the garb of a herdsman," वल्लभरूपधारिणः, धृतगोपालरूपस्य).

गौर gaura, *adj.* White, hoary. Whitish, pale yellow (शुभ्र, शुक्ल). गौरः 1 *c. sin. m.* गौरम् 2 *c. sin. m.* गौरस्य 6 *c. sin. m.*

गौरव gaurava, *s.n.* Weight, heaviness. Influence. Veneration, respect, reverence. गौरवाय 4 *c. sin.* (अलङ्घनीयत्वाय, अनुल्लङ्घनीयत्वाय, आदराय, अप्रकम्पत्वाय).

गौरी gaurī, The (fair-complexioned) goddess Gaurī, wife of Śiva (पार्वती).

वचन vachana, *s.n.* Language, speech, word; accent. वचनात् 5 *c. sin.*

वचस् vachas, *s.n.* A word. वचोभिः 3 *c. pl.*

वञ्चित vañchita, *p.p.* (of वञ्च vañch) Cheated, tricked, defrauded. वञ्चितः 1 *c. sin. m.* (विप्रलब्धः—जन्मैव विफलं. जन्मवैफल्यं भवेत्, जन्मफलवन्ध्यः).

वडभि vaḍabhi (or वडभी vaḍabhī) A temporary structure or awning (आच्छादनी) on the top of a palace; also a room or turret so situated. वडभौ vaḍabhau, 7 *c. sin.*

सौधोपरि चतुःपार्श्वमण्डलीं वडभीं विदुः।
सौधपृष्ठे विरचितां मण्डलीं वडभीं विदुः।
वडभी चन्द्रशालेति ख्यातां प्रासादमस्तके।

वत्सा vatsā, *s.f.* A child. Child (a term of endearment). वत्से 8 *c. sin.*

वदन vadana, *s.n.* Face. Mouth. वदनात् 5 *c. sin.*

वदनमदिराम् vadana-madirām (गण्डस्थमद्यं, मुखसुधां, मुखासवं).

अशोकश्चरणाज्जातो वकुलो वदनासवात्।
तरुणीनामकाले ऽपि राजते कुसुमादिभिः॥

"The Aśoka sprung from the foot, the Vakula from the moisture of the lips of young women, even out of season shines with blossoms, etc."

It is said in the Ayur-veda:

अशोकः प्रमदापादपातप्रणयबोधितः।
उन्मीलति विलासीव स्फुटैः कुड्मलकण्टकैः॥

"Aroused by the affectionate solicitation of the foot-fall of a lovely female, like an inamorato, the Aśoka expands with opening buds and prickles."

वधू vadhū, *s.f.* A woman, a young woman, one recently married. वधूनाम् 6 *c. pl.*

वन vana, *s.n.* Wood, forest, thicket (कानन).

वनगज vana-gaja, *s.m.* The wild elephant.

हिमवद्विन्ध्यनिलया गजानां प्रभवा नगाः।

"The birth-places of elephants are mountains; the regions of Himālaya and Vindhya."

वनचर vana-chara, A forester (वनेचर), a savage, one of the barbarous tribes who inhabit woods and mountains, and live by the chase (किरात), the Kirrhadæ of Arrian. The fabulous eight-legged animal called Sarabha.

वनचरवधूभुक्तकुञ्जे vanachara-vadhū-bhukta-kunje, वनचरवधूभिः (शबरस्त्रीभिः, कितवादीनां वनिताभिर् or कान्ताभिर्), उपभुक्ताः (क्रीडार्थं सेविताः) कुञ्जा (लतामण्डपा) यस्य, तादृशे (तस्मिन्नाम्रकूटे)—किरातवनितासेवितलतादिच्छन्नप्रदेशे kirāta-vanitā-sevita-latādi-chhanna-pradeśe. एतेन गिरेः सकौतुकत्वं व्यज्यते.—एतेन वनिताक्रीडास्थान-

दर्शनाभिलाषेण क्षणविश्रामयोग्यता सूचिता—कुञ्जलतागृहा यत्र तस्मिन्.

वनद्विप vana-dwipa, *s.m.* The wild elephant.

वनान्त vanānta, *s.m.* The skirt of a forest. A grove. अन्तशब्दः स्वरूपार्थः "Here the word anta has the meaning of swarūpa, Like, resembling."

वनिता vanitā, *s.f.* A woman. A wife.

वनोपप्लव vanopaplava, *s.m.* (दावाग्नि).

वन्द्य vandya, *fut. p.p.* of वदि् vad-i, Praise, eulogize. वन्द्यैः 3 *c. pl. n.* (वन्दनीयैः, नमस्यैः, नमस्कार्यैः—अनेन निखिलकलुषापहारित्वान्महानुभवता).

वपु vapu, *s.m.* Body, form, figure. वपुः vapuh, 1 *c. sin.*

वपुस् vapus, *s.n.* Body, form, figure. वपुः 1 *c. sin.* (शरीरम्). वपुषि vapushi, 7 *c. sin.*

वप्र vapra, *s.m. n.* A rampart, a mud wall; earth taken from the ditch of a town, and raised as a wall or buttress.

वप्रक्रीडापरिणतगजप्रेक्षणीयम् vapra-krīḍā-pariṇata-gaja-prekshaṇīyam, वप्रे क्रीडायै (or क्रीडया. प्रवृत्तः) परिणतो (नम्रो, कृतदन्ताघातो or तिर्यग्दत्तप्रहारो) यो गजः (करी) तद्वत् प्रेक्षणीयम्).

वयम् vayam, 1 *c. pl.* of अस्मद् asmad, *pron.* I.

वरम् varam, Rather, better, preferable. (श्रेष्ठं वर्तते). मरणे यानि चिह्नानि तानि चिह्नानि याचने।

"Whatever symptoms are at death, the same are at presenting a petition."

वराह varāha, *s.m.* A boar. वराहाः 1 *c. pl.*

वर्ग varga, *s.m.* A class, tribe. वर्गम् 2 *c. sin.*

वर्ण varṇa, *s.m.* Colour, hue, tint.

वर्णचौरे varṇa-chaure, (कान्तिहारके, तद्वर्णसमानवर्णे, नीलवर्णे—श्रीकृष्णसमानश्यामवर्णे śrī-kṛishṇa-samāna-śyāma-varṇe).

वर्णमात्रेण varṇa mātreṇa, केवलं वर्णेन, वाह्यमलिनः, न केवलं बलभद्रः शुद्धो -भवत्, त्वमपि भावी.

वर्तिन् vartin, *agt.* Abiding, being. वर्ती 1 *c. sin. m.*

वर्त्मन् vartman, *s.n.* Road, way, path. वर्त्म 2 *c. sin.* (पन्थानं, मार्गं, परभागवर्ति वर्त्म).

वर्धित vardhita, *p.p.* (of वृध vridh, *causal form*) Made to grow; reared, brought up. वर्धितः 1 *c. sin. m.* (पोषितः, लालनादिना प्रतिपालितः—परोपकारादिना or जलसेचनादिना वृद्धिं प्रापितः पुत्रवत् संवर्धितः).

वर्ष varsha, *s.m.* Rain. A year (षड्ऋतुरूपः संवत्सरः shaḍ ṛitu-rūpah samvatsarah).

वर्षाग्रविन्दून् varshāgra-vindūn (वृष्टिप्रथमजलकणान् vṛishṭi-prathama-jala-kaṇān).

वर्ह varha, *s.n.* The tail or train of a peacock. वर्हम् 2 *c. sin.* (पिच्छं). वर्हेण 3 *c. sin.* (मयूरपुच्छेन).

वर्हभार varha-bhāra, *s.m.* A peacock's train. वर्हभारेषु 7 *c. pl.* (पुच्छकलापेषु, वर्हसमूहेषु, शिखण्डवृन्देषु).

वर्हिन् varhin, *s.m.* A peacock. वर्हिणः 1 *c. pl.*

वलय valaya, *s.m. n.* Bracelet, armlet. Boundary, circle. वलयम् 1 or 2 *c. sin.*

वलयकुलिशोद्घट्टनोद्गीर्णतोयम् valaya-kuliśodghaṭṭanodgīrṇa-toyam, वलयानां (कङ्कणानां) यदत् कुलिशं (हीरकं) तस्योद्घट्टनेन उद्गीर्णं (स्रावितं or वान्तं) तोयं येन स तथा तं.

वलाका valākā, *s.f.* A small kind of crane. वलाकाः 1 or 2 *c. pl.* (विसकण्ठका, वलाकाङ्गनाः).

वलाका कामुकी प्रोक्ता वलाकस्तरलो मतः।

"The Valākā is called amorous; the Valāka is considered lively."

वलाहक valāhaka, *s.m.* A cloud. वलाहकाः 1 *c. pl.*

वल्मीक valmīka, *s.m.* A hillock, especially the large accumulation of soil sometimes made by the white ant (पिपीलिकादिकृतो मृत्सञ्चयविशेषः).

वल्मीकाग्रात् valmīkāgrāt (वामलूरविवराग्रभागात्) वामलूरे गिरेः शृङ्गे वल्मीकपदमिष्यते

"The term Valmīka is used for an ant-hill or a mole-hill on the summit of a mountain."

वश vaśa, *s.m.* Subjection, thraldom. वशात् 5 *c. sin.*

वशिष्ठ vaśishṭha, *s.m.* The divine sage Vaśishṭha.

वसत् vasat, *pres. p. par.* of वस 1 *c.* Dwell. वसन्तम् 2 *c. sin. m.* (तिष्ठन्तं, वर्तमानं).

वसति vasati, Abode, residence, home. Stay, sojourn. वसतिः 1 *c. sin.* (वासभूमिः, निवासस्थानं, वसतिस्थानं). वसतिम् 2 *c. sin.* (स्थितिं, वासं, निवासं). वसतयः 1 *c. pl.*

वसन vasana, *s.n.* A garment, vesture, robe, clothes, raiment. वसनम् 2 *c. sin.* (वस्त्रं).

वसुधा vasudhā, *s.f.* Earth, ground (अवनी).

वस्तु vastu, *s.n.* A thing, an article, object. वस्तुनि 7 *c. sin.* (पदार्थे, स्नेहपात्रे).

वहति vahati, *also* वहसि *pres. par.* of वह vah, 1 *cl.* Carry, bear; also wear (हरति, नयति, धारयति,

बिभर्ति)—इत्येवं यदि स्यात् तदास्माकमुपरि पतेदिति वितर्कस्त्रासां मुग्धत्वात्

"From silliness, the reasoning of those [females] is, 'If it be so, then it might fall upon us.'"

वा vā, *ind.* Or, either, whether. Like. An expletive.

वाचाल vāchāla, *adj.* Talkative, chattering, boastful. **वाचालम्** 2 *c. sin. m.* (असम्बन्धभाषिणं, बहुजल्पकं, बहुभाषिणं, असत्यबहुभाषिणं, प्रलापिनं).

वात vāta, *s.m.* Wind, breeze. **वातः** 1 *c. sin.* **वातैः** 3 *c. pl.*

वातायन vātāyana, A window (**गवाक्ष**).

वातायनस्थ vātāyana-stha, *agt.* Standing (or being) at a window. **वातायनस्थः** 1 *c. sin. m.* (सौधमय-गवाक्षस्थः सन्) पश्य Observe,

सखा ध्यानं च पितरौ मित्रदूतशुकादयः।
सुखयन्तीष्टकथनं सुखोपायै र्वियोगिनां ॥

"A companion, meditation, parents, a friend, a messenger, a parrot, etc., conversation about a beloved, by happy expedients minister to the comfort of those in a state of separation."

अनेन जागरणावस्थोक्ता "By this a waking condition is intimated."

वानीर vānīra, *s.m.* A sort of cane or rattan.

वान्त vānta, *p.p.* (of **वम** vam) Vomited, ejected.

वान्तवृष्टिः vānta-vṛishtih, **वान्ता** (उद्गीर्णा, आविष्कृता or सृष्टा) वृष्टि (वर्षणं) येन तादृशस्त्वम्—उद्गीर्ण-तोयः सन्, व्यथितवृष्टिजलस्त्वं, कृतवर्षणः.

वापी vāpī, *s.f.* A large oblong pond. **वापी** 1 *c. sin.* (दीर्घिका).

वाम vama, *adj.* Left (not right). Beautiful, pleasing. **वामः** 1 *c. sin. m.* (सव्यः, वामदेशस्थः, वामभागाश्रितः, वामपार्श्ववर्ती, वामभागस्थः, वामदिग्वर्ती, शोभनः, मनोहरः).

वामे मधुरवाक् पक्षी वृक्षाः पल्लविनो ऽग्रतः।
अनुकूलं वहन् वायुर्यात्रायाः शोभनो मतः ॥

"On the left, a sweet-voiced bird; in front, trees full of new shoots; [or] a wind blowing favourably is deemed auspicious for a journey."

वामपादाभिलाषी vāma-pādābhilāshī, यथा पुष्पार्थं स (the red Aśoka) वामचरणमभिलषति तथाहमपि ऊरुस्फोटबन्धार्थमभिलषामि — यथाहं कोपमुत्पाद्य तत्पादप्रहारं वाञ्छामि तथा सो ऽपि.

वायु vāyu, *s.m.* Wind, air, gale. **वायुः** 1 *c. sin.* **वायौ** 7 *c. sin.* (वाते, वनवाते).

वारि vāri, *s.n.* Water, fluid. **वारिभिः** 3 *c. pl.*

वारिधारासहस्रैः vāri-dhārā-sahasraih (असङ्ख्येय-जलधाराभिः "by innumerable streams of water").

वार्ता vārtā, *s.f.* News, tidings, intelligence. **वार्ताम्** 2 *c. sin.*

वाष्प vāshpa, *s.m.* A tear. Vapour, hot mist, steam (such as rises from the ground on the falling of the first rain). **वाष्पम्** 2 *c. sin.* (अश्रु, नयनवारि).

वाष्पो नामाश्रुणः पूर्वावस्था ऽसौ जायते त्रिधा।
निमित्तत्रयसम्बन्धाद् आनन्देर्ष्यार्तिसम्भवः ॥

"The first state of a tear is vāshpa, 'moisture,' and arises in three ways—from a concurrence of three causes, and springs from joy, envy, or pain."

Agnin:

वाष्पपरिप्लवनेत्रः श्वासवशाद्विन्नमुखवर्णः।
योगीव ध्यानरतो भवति हि निर्वेदात् पुरुषः ॥

"For, from despondency, a man, with his eyes drowned in tears, the hue of his face changed through the [prostrating] influence of sighs, becomes given up to meditation like a Yogi."

Again:

इष्टजनविप्रयोगाद् दारिद्र्याद् व्याधितस्तथा दुःखात्।
परवृद्धिं वा दृष्ट्वा निर्वेदो नाम सम्भवति ॥

"Despondency indeed arises through separation from a beloved person, from poverty, from sickness, also from pain, or from witnessing another's aggrandizement."

वास vāsa, *s.m.* A dwelling. A roosting-place.

वासयष्टिः vāsa-yashṭih, (निवासस्तम्भः, वासार्थं यष्टिः, वसतिस्तम्भः, निवासदण्डः).

वासर vāsara, *s.n.* A day. **वासराणि** 1 *c. pl.*

वासव vāsava, *adj.* Belonging to, or commanded by **वासव** Vāsava (Indra). **वासवीनाम्** 6 *c. pl. f.* (इन्द्रसम्बन्धिनीनां, ऐन्द्रीणां).

वासस् vāsas, *s.n.* Clothes, raiment, garment. **वासः** 2 *c. sin.* (वस्त्रं, वसनं). **वाससि** 7 *c. sin.* (वस्त्रे, प्रच्छदपटे).

वासित vāsita, *p.p.* (of **वास**) Perfumed, scented. **वासितम्** 2 *c. sin. n.* (सुरभीकृतम्). Some say that तिक्तैर्मदैर्वासितं means विरसीभूतं "become tasteless, vapid, or insipid."

वास्यति vāsyati, 2 *fut. par.* of **वा** vā, Blow.

वाहयेत् vāhayet, *pot. par.* of **वह** vah, Carry, *causal form*, Continue, prosecute (निर्गमयेत्, गमनेनातिक्रमयेत्, उल्लङ्घयेत्).

वाह्य vāhya, *adj.* Outer, external (बहिर्भव).

वाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या vāhyodyāna-sthita-hara-śiraś-chandrikā-dhauta-harmyā

बाह्ये (बहिर्भवे) उद्याने (आरामे or निर्गमदेशे) स्थितस्य (रहितस्य) महादेवस्य (महेश्वरस्य) शिरसः (or शिरसि) चन्द्रिकया (ज्योत्स्नया) धौतानि (धवलितानि, निर्मलानि, उज्ज्वलीभूतानि or प्रक्षालितानि) हर्म्याणि (धवलगृहाणि, धनिभवनानि or धनिनां गृहाणि) यस्यां तादृशी.

तस्याङ्गने हर्म्यपृष्ठे तथोद्याने सरःसु च।
प्राप्तानां रमणीयेषु कामः सञ्जायते नृणाम्॥

"To men arrived in the delectable [regions] thereof, pleasure springs up in the court, on the palace-roof, in the garden and in the lakes."

वि vi, *prep.* Apart, away, without, dis, di.

विकच vikacha, *adj.* Blown, open, expanded, spread (as a flower).

विकार vikāra, *s.m.* A change.

विक्लव viklava, *adj.* Bewildered, perplexed, confounded; fearful, afraid. विक्लवाः 1 *c. pl. f.* (विह्वलाः, भीरवः, कातराः गर्जितासहाः "impatient of thunder," कामव्यग्राः kāma-vyagrāh).

विक्षिपत् vikshipat, *pres. p. par.* of क्षिप 6 *cl.* with वि, Throw aside. विक्षिपन्तीम् 2 *c. sin. f.* (विकीर्णयन्तीम्, चालयन्तीम्, अपसारयन्तीम्, इतस्ततः प्रापयन्तीम्).

विगणय vigaṇaya, *imp. par.* of गण 10 *cl.* with वि, Reckon, calculate; reflect, consider, deliberate, ponder (विचारय). विगणयन् 1 *c. sin. m. pres. p.*

विगम vigama, *s.m.* Separation, departure. विगमात् 5 *c. sin.* विगमे 7 *c. sin.*

विगलित vigalita, *p.p.* (of गल with वि) Removed, gone; dissipated, dispersed.

विगलितशुचा vigalita-śuchā (विगतशोकेन).

विगलितशुचौ vigalita-śuchau, (विगलितो शुक्शापो ययोस्तौ) अपगतविरहदुःखौ apagata-viraha-duhkhau.

विचर vichara, *imp. par.* of चर, 1 *cl.* Go, with वि, Roam, wander (गच्छ).

विजय vijaya, *s.m.* Victory, conquest, triumph.

विटप viṭapa, *s.m. n.* The branch of a tree with its new sprouts or shoots.

वितत्य vitatya, *ind. p.p.* (of तन Stretch, with वि vi) Stretching into, extending far. (व्याप्य, pervading).

विदधति vidadhati, *pres. par.* of धा 3 *cl.* Hold, with वि vi, Cause, create.

विदित vidita, *p.p.* (of विद्) Known. विदिते 7 *c. sin. m.* (ख्याते).

विदित्वा viditwā, *ind. p.p.* (of विद्) Having known (ज्ञात्वा).

विदिशा vidiśā, *s.f.* Vidiśā, the capital city of the district of Daśārṇa.

विदिशालक्षणाम् vidiśā-lakshaṇām, लक्षणं (नामधेयं) यस्यास्तां, सर्वत्र प्रसिद्धां शूद्रकस्य पुरीम्.

"The city of S'ūdraka well known everywhere (Vienna is familiarly termed, 'The Emperor's city')"

विदुर vidura, *adj.* Agitated, distressed. Separated, absent. विदुरः 1 *c. sin. m.*

विद्ध viddha, *p.p.* (of विध vidh, Pierce, or व्यध vaydh, Beat) Thrown, sent, directed, wafted. विद्धः 1 *c. m.*

विद्धि viddhi, *imp. par.* of विद् vid, 2 *cl.* Know, understand (जानीहि, अवेहि).

विद्युत् vidyut, *s.f.* Lightning. विद्युता 3 *c. sin.* (तडिता).

विद्युत्कम्पस्तिमितनयनाम् vidyut-kampa-stimita-nayanām, विद्युत् कम्पेन (चलनेन) स्तिमिते (निश्चले) नयने (लोचने) यस्यास् तादृशीं—विद्युत्कम्पेन (तडित्प्रकाशेन) स्तिमितनयनाम् (निश्चलनेत्रां)—आकस्मिकप्रकाशात् स्थिरीकृतलोचनाम्.

विद्युत्वत् vidyutwat, *adj.* Having, holding, containing, charged or fraught with lightning (a cloud). विद्युत्वन्तम् vidyutwantam, 2 *c. sin. m.* (तडिल्लितायुक्तम्, विद्युल्लसितम्, तडिद्युक्तम्).

विद्युदुन्मेषदृष्टिम् vidyud-unmesha-dṛishṭim, विद्युदुन्मेष एव (तडित्प्रकाश एव) दृष्टिस्तां—उन्मेषस् तन्निभां (तत्सदृशीं, तद्वत् शोभमानां—विद्युदुन्मेषः (स्फुरणं) स एव दृष्टिस् ताम् अन्तर्भवनपतितां—विद्युदुन्मेषदृष्टिं विद्युत्प्रकाशमेव दृष्टिं (दर्शनं) कर्तुमर्हसि.

विद्युद्दामन् vidyud-dāman, *s.f.* Lightning's flash, a streak of lightning.

विद्युद्दामस्फुरणचकितैः vidyud-dāma-sphuraṇa-chakitaih, (विद्युन्मालाचक्षैः, तडिन्मालाप्रकाशेन भयकुण्ठितैः—सौदामिनीस्फुरणेन सचमत्कारैः, विद्युल्लतास्फुरितेन). विद्युद्दाम्नां, तडिद्गणानां.

विधि vidhi, *s.m.* Fate, luck, destiny. Mode, manner, method, way. विधिना 3 *c. sin.* (व्यापारेण, दैवेन).

विधिवशात् vidhi-vaśāt, (दैवाधीनत्वात्, दैववशात्, विधातुरायत्तत्वात्).

विधुर vidhura, *adj.* Distressed, disquieted, filled with anxiety (विरहपीडित, व्याकुल). विधुर इति असौ विधुरः (अतिदुःखी) इति कृत्वा or विधुरे

इति सप्तम्यन्तं "ending in the 7th case," मयीत्यस्य विशेषणं an epithet of mayi. विधुराम् 2 *c. sin. f.* (विकलां, विवशां, दुःखिनीम्).

विनयन vinayana, *s.m.* A removing, taking away. विनयने 7 *c. sin.*

विनिष्क्रिय vinishkriya, *adj.* Abstaining from ceremonial rites (क्रिया kriyā).

विनोद् vinoda, *s.m.* Amusement, diversion, pastime. विनोदाः vinodāh, 1 *c. pl.* (क्रीडाप्रकाराः, चित्तावलम्बनस्थानानि).

विन्दु vindu, *s.m.* A drop. विन्दून् 2 *c. pl.*

विन्ध्य vindhya, *s.m.* The Vindhya mountain range.

विन्यस्यत् vinyasyat, *pres. p. par.* (of अस as, 4 *cl.* Throw, with नि ni and वि vi) Adjust, arrange, ascertain, determine, fix, settle. विन्यस्यन्ती 1 *c. sin. f.* (स्थापयन्ती, निर्धारयन्ती — निधारणं करिष्यतीति सम्भावयामीति "I think it likely she will determine").

विपुलजघनाम् vipula-jaghanām (पृथुनितम्बां pṛithunitambām).

विप्रबुद्ध viprabuddha, *p.p.* (of बुध budh, with प्र and वि) Wakened, awake. विप्रबुद्धा 1 *c. sin. f.* (जागरिता, जाग्रदवस्थामापन्ना jāgrad-avasthām āpannā, "attained a waking condition").

विप्रयुक्त viprayukta, *p.p.* (of युज yuj, Join, with प्र and वि) Separated, disjoined, sundered, severed. विप्रयुक्तः 1 *c. sin. m.*

विप्रयोग viprayoga, *s.m.* Absence, separation, disjunction. विप्रयोगः 1 *c. sin.* (विच्छेदः). विप्रयोगे 7 *c. sin.* (दृष्टजनविरहे सति ishṭa-jana-virahe sati, and as applicable to a flower वृन्तच्छेदे vṛinta-chchhede, "Separation from the stalk").

विप्रलब्धा vipralabdhā, *s.f.* A mistress whose lover is not true to his appointment (much the same as खण्डिता khaṇḍitā).

दूतीं प्रेष्य च कृत्वा च किञ्चित् सङ्केतकं प्रियः।
दैवात् तु नागतो यस्या विप्रलब्धामिमां विदुः॥

"They call her whose lover having both despatched a female messenger and having made a certain assignation, yet by ill-luck fails to come, Vipralabdhā ('disappointed, jilted')."

विफल viphala, *adj.* Fruitless, useless, unavailing.

विफलप्रेरणा viphala-preraṇā, Flung in vain (निष्प्रयोजना प्रेरणा (प्रक्षेपो) यस्यां सा तथा — अनर्थप्रेरणा, निरर्थकाक्षेपा, निष्प्रयोजनविक्षेपा, दीपनिर्वापणाद्यमत्वान्निष्फला भवति).

विभ्रंशिन् vibhransin, *agt.* Dropping, fallen, dropped. विभ्रंशिभिः 3 *c. pl. n.* (च्युतैः).

विभ्रम vibhrama, *s.m.* Agitation, perturbation, flurry. Blandishment, grace, elegance. Any display of female charms (even to ornaments and apparel) made with the design to inflame and to captivate. विभ्रमैः 1 *c. sin.* विभ्रमैः 3 *c. pl.* विभ्रमाणाम् 6 *c. pl.* कामिन्यो हि विभ्रमैरेव सुरताभिलाषमाविर्भावयन्ति न तु प्रार्थनां कुर्वन्तीति. विलासैरेव रागप्रकाशनं न तु कण्ठत "orally" एव.

विमल vimala, *adj.* Clean, pure, white. Beautiful.

विमान vimāna, *s.n.* A palace. विमानैः 3 *c. pl.* (सौधमन्दिरैः, तत्तत्प्रमहत्तमैः शिरोरुहैः प्रासादैः).

विमानाग्रभूमीः vimānāgra-bhūmīh, विमानानां (सौधानाम्) श्रेष्ठप्रदेशान् — अलकाविमानशिखरचित्रशालिकाः alakā-vimāna-śikhara-chitra-śālikāh. विमानं (सौधं) तस्याग्राम् (श्रेष्ठा) भूमिर्, गृहमध्यं.

विमुख vimukha, *adj.* Turning away, having the face (मुख) averted; averse, disinclined; desisting, forbearing. Withholding, restraining. विमुखः 1 *c. sin. m.* (पराङ्मुखः)

विम्ब vimba, *s.m. n.* A reflected image. A disk (of the sun or moon). *s.n.* A cucurbitaceous plant with red fruit.

वियुक्त viyukta, *p.p.* (of युज yuj, Join, with वि) Severed, separated. वियुक्ताम् 2 *c. sin. f.* (वियोगिनीं, प्रोषितां).

वियोग viyoga, *s.m.* Absence, separation. वियोगः 1 *c. sin.* वियोगेन 3 *c. sin.*

विरचित virachita, *p.p.* (of रच with वि) Made, contrived, constructed, arranged; composed, written. Worn, used. विरचिताम् 2 *c. sin. f.* (निर्मितां कल्पितां, हस्तिपकादिभिः कृतां शोभासम्पादमिवः वक्रगतायां नद्यां रेवातुल्यत्वं).

विरचितपदम् virachita-padam, रचितं पदं (वाक्यं शब्दो वा) यत्र पदं. वि vi, as a prefix, gives a peculiar and restricted sense to a word.

विरचितवपुः virachita-vapuh, (विशिष्टं कृतशरीरः, रचितशरीरः or कल्पितशरीरः सन्).

विरह viraha, *s.m.* Separation, parting, absence, especially the separation of lovers (विच्छेद). विरहात् 5 *c. sin.*

विरहगुणितम् viraha-guṇitam (विरहेण वर्धितम्).

विरहज viraha-ja, *adj.* Arising from separation, produced by absence.

विरहजनितैः viraha-janitaih (विच्छेदोत्पातितैः).

विरहतनुताभावगम्यम् viraha-tanutā-bhāva-gamyam, विरहेण या तनुता (क्षशता) सा भावगम्या (अभिप्रायबोध्या) यत्र तादृशं—विरहेण (वियोगेन) तनुता (कार्श्ये) तया भावो (=भिप्रायस्) तेन गम्यम् (अनुमेयं).

विरहव्यापदः viraha-vyāpadah, विरहे (विच्छेदे) विगता आपद् (विपत्तिर्) येषां तादृशान् (स्नेहान्).

विरहशयने viraha-śayane (मद्वियुक्तशय्यायाम्—विरहे यच्छयनं तस्मिन् भूतले न्यस्ते पल्लवादौ).

विरहावस्थया virahāvasthayā (वियोगदशया, विरहज्वरेण "By the fever of separation").

विलसत् vilasat, *pres. p. par.* of लस 1 *cl.* with वि vi, Sport, dart (स्फुरत्).

विलसत्कृष्णसारप्रभाणाम् vilasat-kṛishṇasāra-prabhāṇām, विलसन्ती (विशेषेण कान्तिमती) कृष्णसारस्य (चतुर्गोलकस्य) प्रभा (कान्तिर्) येषां—विलसन्ती (प्रकाशमाना) कृष्णसारस्य (निविडकालिममध्यभागस्य) गोलकस्य प्रभा यत्र तेषां—मृगविशेषाणामिव प्रभा (कान्तिर्) येषां कृष्णशुक्ल्याक्षतिर्भवति तद्वत्.

विलसन vilasana, *s.n.* Sport, play. विलसनात् 5 *c. sin.* (स्फुरणात्).

विलसित vilasita, *s.n.* Sporting.

विल्व vilwa, *s.m.* A fruit-tree commonly called Bel.

विवर्ण vivarṇa, *adj.* Colourless, discoloured. विवर्णमणीकृतम् vivarṇa-maṇīkṛitam, 1 *c. sin. n.* Having the gems made colourless (sullied, tarnished).

विशति viśati, *pres. par.* of विश् viś, 6 *cl.* Enter; become joined or united to (आलिङ्गति, अनुप्रवेशतया गाढमाश्लिष्यति, संयोगमाश्रयति).

विशद् viśada, *adj.* White, bright, clear, pellucid. विशदैः 3 *c. pl. m.* विशदम् 2 *c. sin. n.* विशदानि 2 *c. pl. n.* (धवलानि, अतिस्वच्छानि).

विशाल viśāla, *adj.* Great, large, spacious. Eminent. विशालाम् 2 *c. sin. f.*

विशाला viśālā, *s.f.* One of the names of the city of Ougein. विशालाम् 2 *c. sin.*

विशीर्ण viśīrṇa, *p.p.* (of शॄ śrī, with वि) Withered; wasted, shrunk, slender. विशीर्णाम् 2 *c. sin. f.* (स्खलितां, इतस्ततोगतां, खण्डखण्डीभूतां, शतशः स्फुटितां Parted (split up) into a hundred streamlets,

विशेष viśesha, *s.m.* A particular, a property or a quality. A particular spot, any distinguished place. विशेषान् 2 *c. pl.* (प्रदेशान्, स्थानविशेषान्, बहुविधान् कन्दरान्—प्रकारान्, नद्यादिस्वरूपान्, शृङ्गरचरणन्यासप्रभृतीन्).

विश्रान्त viśrānta, *p.p.* (of श्रम śram, with वि) Rested, reposed. विश्रान्तः 1 *c. sin. m.* (विगतश्रमः सन्, कृतविश्रामः, गतखेदः सन्—पर्वताधिवासात् विश्रामानन्तरं).

विश्राम viśrāma, *s.m.* Rest, repose (खेदापनय).

विश्लेषित viśleshita, *p.p.* (of श्लिष ślish, Embrace, with वि) Severed, separated, disunited. (विश्लेषितस्य 6 *c. sin. m.* (वियोजितस्य, विघटितस्य, वियोगितस्य, विच्छेदविषयीकृतस्य).

विश्वकर्मन् viśwa-karman, *s.m.* (He of all work) Viśwakarma, architect of the gods, and the Hindu Vulcan. विश्वकर्मा 1 *c. sin.*

विषम vishama, *adj.* Uneven, rough, rugged. विषमे 7 *c. sin. m.* (विसदृशे, उच्चनीचभूते, निम्नोन्नते, पाषाणशिलादन्तुरे; अयमेव शीर्णताहेतुः "This, in fact, is the cause of the shrunken condition (of the river)." अत्र मेघो नायकः—रेवा नायिका—विन्ध्यपादः क्रीडास्थानम्—उपलवैषम्येण नानारत्नयोगाद् विचित्रवेशत्वं.

विषय vishaya, *s.m.* Sphere, department; order, range, reach. विषयम् 2 *c. sin.* विषये 7 *c. sin.*

विष्णु vishṇu, *s.m.* Vishnu. विष्णोः 6 *c. sin.* (कृष्णस्य, नारायणस्य, वृन्दावनस्थश्रीनन्दनन्दनस्य, गोकुलावतीर्णस्य, वल्लभरूपस्य, वामनरूपस्य, त्रिविक्रमस्य). It is said:

दर्शनं स्पर्शनं शस्तं मङ्गलानां श्रुतिस्तथा ।
रत्नानां कीर्तनं चैव तथा विष्णोश्च कीर्तनम् ॥

"Blessed is a sight, a touch, a hearing of the auspicious [names] or even a description of the jewels, as also a celebration of the praise of Vishṇu."

ब्राह्मणान् कर्मनिर्दिष्टान् विष्णुं वा द्वेष्टि यो नरः ।
श्रेयांसि तस्य नश्यन्ति रौरवं च भवेत् पुनः ॥

"The man who dislikes Brahmans duly set apart to their sacred office, or Vishṇu—his good things perish, and misery awaits him hereafter."

विस visa, *s.n.* The fibre of the stalk of the water-lily (विष, मृणाल).

विसकिशलयच्छेदपाथेयवन्तः visa-kiśalaya-chchheda-pātheyavantah, छिन्नानि विसकिशलयानि (पद्मनवीनपल्लान्येव) पाथेयानि (पथिभोज्यानि)

• तद्वन्तः—पाथेयं (सम्बलं) तद् विद्यते येषां ते तथा—विसानां किशलयानि तेषां छेदाः (शकलानि) तान्येव पाथेयं विद्यते येषां ते तथा.

विस्तार् vistāra, *s.m.* A spreading, extension, largeness, swell, breadth, amplitude (परिणाह).

विस्मरत् vismarat, *pres. p. par.* of स्मृ smṛi, 1 *cl.* Remember, with वि vi, Forget. विस्मरन्ती 1 *c. sin. f.*

विस्मित vismita, *p.p.* (of ष्मि shmi, Smile, with वि vi) Surprised, astonished; gazing with surprise, staring with astonishment.

विस्मृत vismṛita, *p.p.* (of स्मृ Remember, with वि) Forgotten. Forgetful.

विस्मृतभ्रूविलासम् vismṛita-bhrū-vilāsam, विस्मृतो (×वज्ञो) भ्रूविलासो (भ्रूवैदग्ध्यं) येन तादृशं—विस्मृतभ्रूवैदग्ध्यं.

विहग vihaga, *s.m.* A bird. Waterfowl.

विहरेत् viharet, *pot. par.* (of हृ hṛi, Take, with वि) Saunter, stroll, take a walk for pleasure, pastime, or amusement (विचरेत्, विहारार्थं गच्छेत्, विशेषेण लीलया गच्छेत्).

विहस्य vihasya, *ind. p.p.* (of हस has, Laugh, with वि) Having laughed or smiled; laughing at, deriding, contemning (विनिन्द्य). It is said:

शृङ्गारः श्यामलो ज्ञेयः सितो हास्यः प्रकीर्तितः।

"Love is to be regarded as sombre; laughter has been declared white."

विहातुम् vihātum, *inf.* of हा, Quit, leave, let go, with वि. त्यक्तुम्—अलं बुद्ध्या त्यक्तुं समर्थो भवति

"Away with the notion that he is able to leave."

वीक्षमाण vīkshamāṇa, *pres. p. ātm.* of ईक्ष īksh, 1 *cl.* See, with वि vi. वीक्षमाणाः 1 *c. pl. m.* (विशेषात् पश्यन्तः, दर्शयन्तः, आकाङ्क्षे पश्यन्तः).

वीक्ष्य vīkshya, *ind. p.p.* (of ईक्ष īksh, See, with वि) Having seen, beheld, viewed (विशेषेणावलोक्य).

वीक्ष्यमाण vīkshyamāṇa, *pres. p. pass.* (of ईक्ष īksh, See, with वि) Being beheld, gazed at, viewed.

वीचि vīchi, *s.f.* Wave, small ripple. वीचिषु 7 *c. pl.*

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः vīchikshobha-stanita-vihaga-śreṇi-kāṅchī-guṇāyāḥ, वीचिस् (तरङ्गस्य) क्षोभेन (सञ्चालनेन or कम्पनेन) या स्तनिता (शब्दिता or ध्वनिता) विहगानां (हंससारसादीनां पक्षिणां) श्रेणिः (पङ्क्तिः) सैव (काञ्चीगुणो (मेखला or दाम or कटिधृताभरणगुणो) यस्यास् तथाभूता या.

वीणा vīṇā, *s.f.* The vīnā or Indian lute, a fretted instrument of the guitar kind, usually having seven wires or strings, and a large gourd at each end of the finger-board: the extent of the instrument is two octaves; it is supposed to be the invention of Nārada, the son of Brahmā, and has many varieties. वीणाम् 2 *c. sin.*

वीणिन् vīṇin, *adj.* Possessed of a lute. A player on the lute, a lutanist. वीणिभिः 3 *c. pl.* (वीणावद्भिः, वीणायुक्तैः, वीणाकरैः, वीणापाणिभिः, अर्थात् भगवन्तं स्कन्दं उपवीणयितुम् "to serenade" आगच्छद्भिः (or आगतैः).

वृक्ष vṛiksha, *s.m.* A tree. वृक्षात् 5 *c. sin.*

वृति vṛiti, *s.f.* A fence, hedge (आवरण, वेष्टन, प्रावरण, प्राचीर). वृतेः 6 *c. sin.* वृतयः 1 *c. pl.*

वृत्ति vṛitti, *s.f.* Being, existence; position in life, character. Style, state, condition. Disposition, tendency.

वृद्ध vṛiddha, *p.p.* (of वृध vṛidh) Grown. Great, illustrious.

वृद्धि vṛiddhi, *s.f.* Growth; augmentation, increase.

वृन्द vṛinda, *s.n.* Heap, multitude, pile; flock, drove, crowd, caravan. वृन्दम् 2 *c. sin.* वृन्दानि 2 *c. pl.* (समूहान्, सार्थान्).

वृष vṛisha, *s.m.* A bull (वृषभ, वाहनानड्वान्).

वृष्टि vṛishṭi, *s.f.* Rain; a shower.

वृहत् vṛihat, *adj.* Great, large. वृहतः 1 *c. pl.*

वेग vega, *s.m.* Velocity, rapidity, impetuosity, momentum; violence, vehemence. वेगेन 3 *c. sin.*

वेणि veṇi or वेणी veṇī, *s.f.* Unornamented and braided hair; the hair as worn especially by widows and women whose husbands are absent, when it is simply collected from the forehead and temples as well as the back of the head, and twisted together into a single braid, which is then suffered to fall like a tail down the back, no sort of ornament being worn on the head. The term is also applied generally to any braid of hair, or to a braid of the long hair, of which many are made; the whole are then twisted together, and worn as a sort of rose or flower at the back of the head. वेणीम् 2 *c. sin.*

वेणीभूतप्रतनुसलिला veṇī-bhūta-pratanu-salilā, वेणीभूतं (वेष्याकारं) प्रतनु (प्रकर्षेणाल्पप्रवाहं स्रोतः) च सलिलं यस्याः सा तथोक्ता. वेणीतुला क्षीणजला त्वददर्शनेन "by not seeing of thee."

वेत्रवती vetravatī, *s.f.* Name of a river. वेत्रवत्याः 6 *c. sin.* निर्जनवेत्रकुञ्जयुक्ताया नद्याः. This river is here spoken of as a mistress who has been deserted by her lover, the Cloud.

वेदि vedi, *s.f.* An altar. वेदिम् 2 *c. sin.*

वेश्मन् veśman, *s.n.* A house. वेश्मभिः 3 *c. pl.*

वेश्या veśyā, Harlot, courtezan. A female ministrant or figurante in the temple of Śiva. Thus Urvasī and her companions are the courtezans of Swerga (उर्वश्यादयः स्वर्वेश्याः). वेश्याः 1 *c. pl.* (नर्तक्यः गणिकाः).

वेष vesha, *s.m.* Dress, guise, garb, costume.

वेष्टन veshṭana, *s.n.* Fence, inclosure.

वै vai, *ind.* Indeed. An expletive.

वैदूर्य vaidūrya, *s.n.* Lapis lazuli.

वैरिन् vairin, *adj.* Hostile, inimical, unfriendly. वैरिणा 3 *c. sin. m.* (प्रतिकूलेन).

व्यक्त vyakta, *p.p.* (अञ्ज anj, Make clear, with वि) Distinct, plain, evident. व्यक्तम् 2 *c. sin. m.* (प्रकाशितया वर्तमानं): अनेन दर्शनयोगिता सूचिता स्पष्टं "By this, fitness to be seen is clearly denoted."

व्यक्ति vyakti, *s.f.* Appearance, manifestation, display. व्यक्तिः 1 *c. sin.*

व्यञ्जयत् vyanjayat, *pres. p. par.* of अञ्ज anj, 10 *cl.* with वि vi, Make visible, manifest, shew plainly. व्यञ्जयन्ती 1 *c. sin. f.* (प्रकाशयन्ती, प्रकटयन्ती, पातिव्रत्यसौन्दर्यं व्यञ्जयन्ती).

व्यतिकर vyatikara, *s.m.* Contact, union, juxta-position; a blending or intermingling. व्यतिकरः 1 *c. sin.* (व्यतिषङ्गः, परस्परसम्पर्कः, अन्योन्यसम्पर्कं मिश्रणम्).

व्यथा vyathā, *s.f.* Pain, pang, distress, ache. व्यथाभिः 3 *c. pl.*

व्यपगत vyapagata, *p.p.* (of गम gam, Go, with अप off, and वि vi, away) Gone off.

व्यपगतशुचः vyapagata-śuchah (वीतदुःखाः सन्तः—अन्यत्र गमनेच्छारूपसन्तापरहिताः सन्तः—पलायितः शोकः (क्लेशो) येषां तादृशाः).

व्यवसित vyavasita, *p.p.* (of षो sho, Destroy, with अव and वि) Resolved, determined. Undertaken. व्यवसिताः 1 *c. pl. m.* व्यवसितम् 1 *c. sin. n.* (अध्यवसितम्, अङ्गीकृतं).

व्यवस्येत् vyavasyet, *pot. par.* of षो sho, 4 *cl.* Destroy, with अव and वि, Try, endeavour, essay, strive. (व्यवसायं or उद्यमं कुर्यात्) (प्रार्थनायां in prayer).

व्यस्त vyasta, *p.p.* (of अस with वि) Driven away, dispelled. Pervaded, penetrated.

व्याकुल vyākula, *adj.* Confounded, confused, bewildered, perplexed, flurried, excited. व्याकुलेन 3 *c. sin. m.* व्याकुला 1 *c. sin. f.*

व्याजहार vyājahāra, 2 *pret. par.* of हृ hṛi, Take, with आ ā and वि vi, Utter, speak, address (उवाच, उक्तवान्, जजल्प).

व्यापद् vyāpad, *s.f.* Calamity, death, decease.

व्यापार vyāpāra, *s.m.* Occupation, employment, business.

व्यालम्बेथाः vyālambethāh, *pot. ātm.* of लबि lab-i, 1 *cl.* with आ ā and वि vi, Hang down. Move slowly, delay (विलम्बं कुर्याः, नम्रो भूयाः जलग्रहणाय, आश्रयिष्यसि, आलम्ब्यापगच्छेः).

व्यालुम्पन्ति vyālumpanti, *pres. par.* of लुप lup, 6 *cl.* with आ ā and वि vi, Remove, take away, carry off (अपनयन्ति, दूरीकुर्वन्ति, हरन्ति).

व्योमगङ्गाजलार्द्रैः vyoma-gangā-jalārdraih, व्योमगङ्गाया (मन्दाकिन्याः) जलेन स्निग्धैः (स्निग्धैः). (आकाशजाह्नवीसलिलपवित्रितैः ākāśa-jāhnavī-salila-pavitritaih).

व्योमन् vyoman, *s.n.* Sky. व्योम्नि 7 *c. sin.* (गगने, आकाशे).

व्रज vraja, *imp. par.* व्रजेयुस् *pot. par.* व्रजते *pres. ātm.* of व्रज 1 *cl.* Go.

श ś, soft, as in "shine," "session."

शक्ष्यति śakshyati, 2 *fut. par.* of शक śak, Be able (शक्यति, पारयिष्यति, समर्थो (शक्तो) भविष्यति).

शङ्कर śaṅkara, *s.m.* A name of Śiva.

शङ्करवृषभ śaṅkara-vṛishabha, *s.m.* Śiva's bull (described as being of the purest white).

शङ्का śaṅkā, *s.f.* Fear, dread, apprehension.

शङ्कास्पृष्टाः śaṅkā-spṛishṭāh (भयव्याप्ताः सापराधत्वात् भयाक्रान्ताः सन्तः, सापराधत्वेन भीता इव जाताः).

शङ्कित śaṅkita, *p.p.* of शकि śak-i) Alarmed, frightened. Doubtful, uncertain; vacant, unsteady (gaze).

शङ्के śaṅke, *pres. ātm.* of शकि śak-i, Fear, dread, apprehend. Think likely, suspect, imagine (तर्कयामि, सम्भावयामि).

शङ्ख śaṅkha, *s.m.* The conch-shell. Name of one of Kuvera's treasures.

शङ्खक्षीर śaṅkha-kshīra, *s.n.* Shell-milk (any impos-

sibility or absurdity, such as pigeon's milk, which with us formerly furnished an errand for some simpleton on the first of April).

शङ्खपद्मौ śaṅkha-padmau, Conch and lotus, two treasures (निधी). पापशान्त्यर्थं दुष्टसत्त्वनिवृत्त्यर्थं गृहे लिख्यते.

"This is painted on the house to expiate sin and to exclude evil beings (as with us an old horse-shoe was nailed on the door-sill to keep out the witches)."

शङ्खपद्मौ निधी यत्र तद् गृहं कलुषं त्यजेत्।

"Evil will avoid that house whereon the two treasures, the conch and lotus (are painted)."

शङ्खपद्मौ निधी चित्रे दृष्ट्वा दुष्टै र्विमुच्यते।

"Seeing the two treasures, the conch and lotus, in a picture, it is left alone by the evil ones."

Some have imagined that a servant paints these objects merely for beauty, and for a compliment intended to his master (शोभार्थं and चाटुत्वार्थं).

शत śata, *s.n.* A hundred. शतैः 3 *c. pl.*

शनकैः śanakaih, *ind.* Softly, gently; with alternations of drinking and singing (मन्दं गाननृत्यानुकूलं, क्षणं मधु पीयते, क्षणं मृदङ्गा वाद्यन्ते).

शब्द śabda, *s.m.* Sound, noise. A word.

शब्दाख्येयम् śabdākhyeyam, शब्देन (गर्जनात् ध्वनिना or रवेण) आख्येयम् (उच्चैर्वाच्यं व्यक्तकथनार्हं न रहस्यभूतं). शब्दप्रतिपाद्यं न तु गोप्यहस्तादिसञ्ज्ञावाच्यं. शब्देन ज्ञाप्यम् (अगोप्यं) प्रकटवाक्यं शब्दैराख्यायते (उद्गीर्यते) यत्तत्.

शब्दायन्ते śabdāyante, *pres. ātm.* a nominal verb, from शब्द śabda, Sound, resound (शब्दं कुर्वन्ति, स्वनन्ति, वंशीध्वनिं कुर्वन्ति).

शब्दित śabdita, *p.p.* (of शब्द śabd) Called.

शमयितुम् śamayitum, *inf.* of शम् śam, *caus. form*, Extinguish, quench, allay (नाशयितुं, निर्वापयितुं, शान्तिं नेतुं, कल्याणं कर्तुं).

शमयेः śamayeḥ, *pot. par.* of शम śam, *caus. form*, Extinguish, allay, destroy (नाशयिष्यसि).

शम्भु śambhu, *s.m.* Name of Śiva, शम्भुना 3 *c. sin.* (महादेवेन, शिवेन). शम्भोः 6 *c. sin.*

शम्भुनादत्तहस्ता śambhunādatta-hastā, शम्भुना (शिवेन) आदत्तो (गृहीतो) हस्तो यस्याः सा.

शयन śayana, *s.n.* A bed, couch. शयनात् 5 *c. sin.* शयने 7 *c. sin.* (शय्यायां, तल्पे, एकस्यां शय्यायां).

शय्या śayyā, *s.f.* A bed, couch.

शय्योत्सङ्गे śayyotsaṅge (शय्यायाः क्रोडे, शय्यामध्ये).

शर śara, *s.m.* A sort of reed or grass. An arrow.

"The arrow-cane grows in large clumps like the Venu. This beautiful and superb grass is highly celebrated in the Purāṇas."—Sir W. Jones' *Select Indian Plants.*

शरण śaraṇa, *s.n.* Refuge, succour, aid, deliverance, deliverer. शरणम् 1 *c. sin.* (रक्षकः, रक्षिता, त्राता, त्राणं, तापनाशेन रक्षिता—प्रोषितानां स्वस्थानप्रेरणाय च).

शरद् śarad, *s.f.* The season of autumn; the two months succeeding the rains.

शरभ śarabha, *s.m.* A fabulous animal, of a fierce and intractable nature, said to have eight legs (अष्टपदमृगविशेषः aṣhṭa-pada-mṛiga-viśeshaḥ), and to inhabit particularly the snowy mountains.

शरवण śara-vaṇa, *s.m.* A thicket of reeds.

शरवणभवम् śara-vaṇa-bhavam, शरस्य वने भूर् (उत्पत्तिस्थानं) यस्य तं (देवं स्कन्दं).

शशिन् śaśin, *s.m.* The moon. शशिनि 7 *c. sin.* (चन्द्रे, चन्द्रमसि).

शश्वत् śaśwat, *ind.* Always, perpetually, incessantly (नित्यं, निरन्तरं, सदा, अनवरतं).

शष्प śashpa, *s.n.* Young grass.

शस्त्रपाणि śastra-pāṇi, *adj.* Weapon-handed, holding a weapon or arms in the hand. शस्त्रपाणयः 1 *c. pl.*

शाखा śākhā, *s.f.* A bough, a branch.

शान śāna, *s.m.* A touchstone.

शान्त śānta, *p.p.* (of शम śam) Allayed, alleviated, pacified, calm.

शान्ति śānti, *s.f.* Alleviation, assuagement, cessation, rest. शान्तिम् 2 *c. sin.* (उपशमम्).

शान्तोद्वेगस्तिमितनयनम् śāntodwega-stimita-nayanam, शान्तेन (दूरीभूतेन) उद्वेगेन (मनोविकारविशेषेण) स्तिमितनयनं (स्निग्धनिश्चललोचनं) यथा स्यात् तथा.

शान्तोद्वेगेन स्तिमितं (स्निग्धं, निश्चलं, क्लिन्नं) नयनं यत्र दर्शने स्थगितनेत्रं यथा स्यात् तथा.

शान्तो (*=पगतो) य उद्वेगस् तेन स्तिमिते (निश्चले) नयने यत्र तथा.

शान्तोद्वेगो (नागाजिनदर्शनभयः) अत एव स्तिमिते (निश्चले) नयने यस्मिन् कर्मणि तत्तथोक्तं.

बीभत्साभावात् प्रिया (प्रीता) सती भवानी विनयस्तिमितनयनत्वात् प्रेक्षिष्यते इति धर्मसम्पत्तिः.

Several of the Commentators, apparently dissatisfied with the above complex compound (seldom

found in Kālidāsa), would detach the words शान्तोद्वेग and apply them to the Cloud, some as a vocative, others as a nominative. It rarely happens, however, that a vocative case is made to coalesce with a following word. They who read the words in the nominative, explain them thus: शान्तोद्वेगः तेजोधारणेन स्वामिभवभयशून्यः सन् त्वं. For स्तिमित these would read तिमित, a word having nearly the same meaning but of less frequency.

शाप śāpa, *s.m.* Curse, anathema, malediction, ban. शापेन 3 *c. sin.* शापस्य 6 *c. sin.* (वर्षविरहरूपस्य).

स्त्र्यासक्ततया पद्मरजा न क्षता तत् त्वं स्त्रीविरही ध्वस्तमहिमा च भवेति तं शशाप.

"He cursed him, saying, 'By dangling after [thy] wife, care has not been taken of the lotuses; therefore be thou parted from [thy] wife, and lose thy greatness.'"

शापान्तः śāpāntah (शापस्यान्तः, शापस्य समाप्तिः, परिसमाप्तिः).

शारङ्ग śāraṅga, *s.m.* The chātaka. शारङ्गाः 1 *c. pl.* Etymologists say that सारङ्ग sāraṅga is derived from सारं sāram, "Water," गायन्ति gāyanti, "They sing." जलं देहीति वदन्ति They say, "Give water." स has been changed to श.

शारिका śārikā. See सारिका.

शार्ङ्ग śārṅga, *adj.* Made of horn (शृङ्ग śṛṅga), horny. *s.n.* A bow in general. The bow of Vishṇu.

शार्ङ्गपाणि śārṅga-pāṇi, A name of Vishṇu. शार्ङ्गपाणौ 7 *c. sin.* (भगवति नारायणे, श्रीनारायणे).

नमो जलदनीलाय शेषपङ्कजशालिने ।

"Salutation to the One blue as a cloud, possessor of [the serpent] S'esha, and the lotus."

शार्ङ्गिन् śārṅgin, *s.m.* A bowman. Vishṇu. शार्ङ्गिणः 6 *c. sin.* (विष्णोः).

शाल्मलि śālmali, *s.m. f.* The silk-cotton or seemul-tree.

शिखर śikhara, The peak or summit of a mountain. A piece of ruby or gem described as of the colour of the ripe pomegranate-seed. शिखरम् 2 *c. sin.*

शिखरदशना śikhara-daśanā, शिखरवत् (कुन्दकुट्मलवत् Like a jasmine-bud) दशना (दन्ता) यस्याः तादृशी—माणिक्यसमदन्ता, शिखरा (अतिशयितायदशना) यस्याः सा तथा.

पक्वदाडिमबीजाभं माणिक्यं शिखरं विदुः ।

"A ruby resplendent as the seed of a ripe pomegranate they call S'ikhara."

One Commentator represents her teeth as white as a jasmine-bud; another as exceedingly sharp at the points; and a third red as a ripe pomegranate seed. Perhaps the last had a partiality for chewing the betel-leaf.

शिखरिन् śikharin, *s.m.* A mountain. शिखरिषु 7 *c. pl.* (गिरिषु, पर्वतेषु, शिखायोगात् उच्चैस् तेन मेघविश्रामयोग्यतेति. वृक्षेषु). पुनर्बललाभार्थं क्वचिद्विश्राम्य. It is said:

पथि विश्राम्य गन्तव्यं विश्रामाज्जायते बलम् ।

"Having rested on the road, one must proceed: from repose ariseth strength."

शिखा śikhā, *s.f.* A lock or tuft of hair on the crown of the head (एकवेणी) It is said:

यथा प्रोषितनाथानां व्यसनाभिद्रुताशयः ।
वेशः स्यान्मलिनस्तासाम् एकवेणीधरं शिरः ॥

"As the mind of those whose lords are far away is overwhelmed with distress, their dress should be soiled, their head wearing a single braid."

शिखिकुलकलकेकाः śikhi-kula-kala-kekāh, 1 *c. pl.m.* Vocal with the soft, shrill cries of flocks of peafowl.

शिखिन् śikhin, *s.m.* A peacock (crested or tufted). शिखिनः 1 *c. pl.* शिखिभिः 3 *c. pl.* शिखिनाम् 6 *c. pl.* (मयूराणां).

शिञ्जत् śiñjat, *pres. p. par.* (as being of the class यजादि) of शिञ्जि śij-i, 2 *cl. ātm.* Tinkle.

परिष्वजति पाञ्चाली मध्यमं पाण्डुनन्दनं ।

"Draupadi embraces the middlemost son of Pāṇḍu (namely, Arjuna)."

शिञ्जद्वलयसुभगैः śiñjad-valaya-subhagaih (शिञ्जत् वलयैः (शब्दायमानकङ्कणैः) सुभगा (रम्यास्) तैः—(क्वणत्कङ्कणमनोहरैः—शब्दायमानकङ्कणैः सुभगास् तैः).

शित śita, *p.p.* (of शो) Pointed, sharpened, whetted.

शितशरशतैः śita-śara-śataih, असह्यात (or असह्य) तीक्ष्णशरैः—(तीक्ष्णबाणशतैः—तीक्ष्णानां शराणां समूहैः, निचिप्तबाणसहस्रैः).

शिथिल śithila, *adj.* Loose, loosened, slack, slackened, relaxed; drooping. शिथिलम् 2 *c. sin. n.* (गलत्, गलितप्रायं Almost dropped).

शिरस् śiras, *s.n.* The head. शिरसा 3 *c. sin.*

शिरीष śirīsha, *s.m.* A kind of tree. शिरीषम् is शिरीषपुष्पम्—अनेन ग्रीष्म उक्तः "By this the hot season is specified."

शिला śilā, *s.f.* A flat stone, slab. A rock. शिलायाम् 7 *c. sin.* (पट्टे).

शिलावेश्मन् śilā-veśman, *s.n.* A rock-house, a house of stone; a chamber excavated in the rock; a cavern, grotto. शिलावेश्मभिः 3 *c.pl.* (पाषाणगृहैः, कन्दरैः, शिलानिर्मितक्रीडागृहैः śilā-nirmita-krīḍā-gṛihaih).

शिलीन्ध्र śilīndra, *s.n.* A mushroom. शिलीन्ध्रशब्देन काष्ठगोमयादौ जाता कवचिका कन्दलीपुष्पं चोच्यते.

शिशिर śiśira, *s.m. n.* The dewy season, comprising two months from the middle of January to that of March. *adj.* Cool. शिशिरान् 2 *c. pl. m.*

शिशिरमथितां śiśira-mathitām (शिशिरेण (शिशिरकालेन) मथितां (पराभूतां), तुहिनमथितां, हिमविलोडितां, सूर्यावस्थाने ऽपि हिमोपतप्तां).

शीत śīta, *p.p.* (of शी śyai) Cold, cool.

शीते सुखोष्णसर्वाङ्गी ग्रीष्मे च सुखशीतला।
भर्तृभक्तिरता नित्यं सा स्मृता वरवर्णिनी॥

"She, whose entire body is agreeably warm in cold weather, and pleasantly cool in hot weather, and at all seasons delights in the service of her lord, is called Vara-varṇinī, or excellent woman."

शीतल śītala, *adj.* Cold, cool. शीतलेन 3 *c. sin. m.* (स्वजलकणिकाशीतलेन swa-jala-kaṇikā-śītalena. निजतोयलवशिशिरेण nija-toya-lava-śiśireṇa—स्वस्य जलकणिकाभि (जैलविन्दुभिः) स्निग्धेन).

शीर्ण śīrṇa, *p.p.* (of शॄ śṛī) Withered, sere, dry. Shrunken.

शीर्णपर्णैः śīrṇa-parṇaih, शुष्कपत्रैः (expressive of the paleness of the countenance).

शुक्ल śukla, *adj.* White.

शुक्लापाङ्ग śuklāpāṅga, *s.m.* A peacock. शुक्लापाङ्गैः 3 *c. pl.* (मयूरैः, सिततरलोचनान्तैः).

शुक्लापाङ्गो मयूरः स्यात् प्रबलाशी भुजङ्गभुक्।

"A peacock should be white in the outer corner of the eye, a hearty eater, a devourer of serpents."

शुच् śuch, *s.f.* Sorrow, grief, regret. शुचः 1 *c. pl.*

शुद्ध śuddha, *p.p.* (of शुध śudh) Purified; pure, clean.

शुद्धस्नानात् śuddha-snānāt, केवलजलोन्मज्जनात्, पानीयमात्राभिषेकात् तैलादिरहितस्नानात् (or गन्धतैलादि, etc.) अतैलादिस्नानात्. ऋतुशुद्ध्यर्थं—ऋतुशुद्ध्यर्थस्नानाद्धेतो र्निःश्वासेन—ऋतुस्नानात् कल्कादिना घर्षणपूर्वकस्नानात्—ऋतुस्नाता हि रागवती भवति, अत एव निःश्वासोष्णताप्रावल्यादिकष्टदायित्वमाह.

ऋतुस्नाताः सनिश्वासं स्मरन्ति गतभर्तृकाः।
कान्तमत्यन्तसञ्जातमदना वेशविक्लवाः॥

"They whose lords are absent, being washed from ceremonial impurity, their passion waxing strong, being disordered in their attire, with a sigh call to remembrance their beloved."

शुभ्र śubhra, *adj.* White.

शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् śubhra-trinayana-vṛishotkhāta-paṅkopameyām, शुभ्रो (धवलवर्णः) त्रिनयनस्य (महादेवस्य or रुद्रस्य) यो ऽसौ वृषो (वृषभस्) तेन उत्खात (उत्पाटितो) यः पङ्कः (कर्दमस्) तेन सहोपमेयो तां—त्रिनयनस्य (महादेवस्य) वृषेण (वृषभेण) शृङ्गाग्र (or शृङ्गाग्रे) धारितो यः पङ्कः (कर्दमस्) तेन उपमेयाम् (उपमार्हाम्). Some read शुभ्रां (उज्ज्वलां) making it agree with शोभां.

शुष्क śushka, *adj.* Dry.

शून्य śūnya, *adj.* Empty, void, destitute. शून्यम् 1 *c. n.*

शूलिन् śūlin, *s.m.* The trident-bearer, *i.e.* Śiva. शूलिनः 6 *c. sin.* (धृतशूलस्य, श्रीशैङ्करस्य, महाकालायतनवासिनो महादेवस्य).

शृङ्ग śṛiṅga, *s.m.* A horn. The peak of a mountain. शृङ्गम् 2 *c. sin.* शृङ्गे 7 *c. sin.* (शिखरे).

शृणु śṛiṇu, *imp. par.* of श्रु śru, 1 *cl. irreg.* Hear, hearken (आकर्णय give ear).

शेष śesha, *s.m.* Remainder, leavings, rest, overplus, whatever remains or is left. शेषम् 2 *c. sin.* शेषैः 3 *c. pl.* (स्वर्गोपभोगावशिष्टैः "with the remains of enjoyments of Swerga," भोगावशिष्टैः, स्वर्गवासजनकैः पुण्यैः). *adj.* Left, remaining. शेषान् 2 *c. pl. m.* (परिशिष्टान्, अवशिष्टान्, अतिक्रान्तेभ्यो मासेभ्यो ऽवशिष्टान्).

शेषविस्तारपाण्डुः śesha-vistāra-pāṇḍuh, शेषे (कुचकेतरभागे, अवशिष्टपरिणाहे, चुचुकाधःस्थाने, or मध्यादन्यविस्तारे परितः) पाण्डुः (हरिणः).

शैल śaila, *s.m.* A mountain, a mount. शैलः 1 *c. sin.* शैलम् 2 *c. sin.* शैलात् 5 *c. sin.* शैले 7 *c. sin.*

शैलराज śaila-rāja, Himālaya, king of mountains.

शैलराजावतीर्णाम् śaila-rājāvatīrṇām, शैलराजात् (हिमालयात् or हिमवतः) प्रसृताम् (प्रादुर्भूतां).

शोभा śobhā, *s.f.* Splendour, lustre, sheen, beauty, comeliness. शोभाम् 2 *c. sin.* सदृशीं शोभां समशुभ्राम् (उज्ज्वलां) श्रियं (कान्तिं).

शोभिन् śobhin, *adj.* Beautiful, graceful. शोभी 1 *c. m.*

स्योत śchyota, *s.m.* Aspersion, sprinkling.

श्याम śyāma, *adj.* Black or dark blue; sable (नील, कृष्ण). श्यामः 1 *c. sin. m.* श्यामम् 1 *c. sin. n.*

अधःस्थितैरूर्ध्वभूतः श्याम इति दृश्यते।

"By those standing below, [anyone] placed on high, is seen as black."

श्यामा śyāmā, A woman described as one who has not borne children (अप्रसूता); having the quality of delicacy, etc. (सौकुमार्यादिगुणवती); of sixteen years (द्विष्टवर्षा); or one who in darkness of complexion resembles the blossom of the Priyangu or its stalk in shape. Name of a plant commonly called Priyangu. श्यामासु 7 *c. pl.* (श्यामलतासु, प्रियङ्गुवल्लीषु अतिसुन्दरलताविशेषेषु). It is said:

शीते या चोष्णगात्री स्यादुष्णे च स्पर्शशीतला।
प्रष्टव्या सुकुमाराङ्गी सा श्यामा कथिता बुधैः॥

"She who by nature is warm-bodied in cold weather, and in warm weather cool to the touch, and very delicate of limb, is by sages called Śyāmā."

And says Bharata:

नातिस्थूलदीर्घाङ्गी न चातिह्रस्वा सस्मितमुखी च।
सरसिजपरागगौरी प्रियङ्गुमञ्जरीसवर्णा वा॥

"Not over-stout or tall of body, nor too short; and smiling-faced; fair as the pollen of the water-lily, or resembling the stalk of the Priyangu."

या अप्रसूता भवेन्नारी तथापि नवयौवना।
सर्वलक्षणसम्पन्ना श्यामा सा परिकीर्तिता॥

"A woman who may not have borne offspring, although still in the freshness of youth, endowed with every auspicious mark, has been proclaimed Śyāmā."

श्यामा शीतलकाले भवेदुष्णा उष्णकाले च शीतला।

"A Śyāmā will be warm in cold weather, and in warm weather cool."

पद्मगन्धि मुखं यस्याः सा श्यामा परिकीर्तिता।

"She whose mouth is fragrant as the lotus is styled Śyāmā."

श्रद्धान śrad-dadhāna, *pres. p. ātm.* (of धा dhā, Hold, with श्रत् śrat, a particle implying Faith) Faithful, believing. श्रद्धानाः 1 *c. pl. m.* (श्रद्धावन्तो जनाः, विश्वसन्तः, भक्तिवन्तः, श्रद्धायुक्ताः, आस्तिक्यबुद्धयः).

श्रम śrama, *s.m.* Weariness, fatigue.

श्रवण śravaṇa, *s.n.* The ear.

श्रवणपरुषैः śravaṇa-parushaih (कर्णासह्यैः karṇāsahyaih, "intolerable to the ear." कर्णकटुकैः).

श्रवणविषयम् śravaṇa-vishayam (कर्णगोचरं karṇagocharam, कर्णपथं karṇa-patham, श्रवणविषयमतिक्रान्तः, अश्राव्यवृत्तान्तः सन्).

श्रवणसुभगम् śravaṇa-subhagam (श्रोत्रमधुरं, श्रोत्राभिरामं, सुखम् अभिरामं).

श्राम्यत् śrāmyat, *pres. p. par.* of श्रम śram, 4 *cl.* Be fatigued; tire, lag. श्राम्यताम् 6 *c. pl.* (श्रान्तिप्राप्तानां, खेदभाजाम्). Some say श्राम्यतां is equivalent to विश्रामं कुर्वताम् "reposing," उपसर्गं विनापि "even without the preposition."

श्रित śrita, *p.p.* (of श्रि) Covered, overspread. श्रिताः 1 *c. pl. m.*

श्री śrī, *s.f.* Beauty, lustre, brightness, splendour. Prosperity, wealth, opulence. Fame, glory. श्रीः 1 *c. sin.* श्रिया 3 *c. sin.* (सम्पत्त्या, शोभया).

श्रीविशालाम् śrī-viśālām, श्रिया (विभूत्या, सम्पत्त्या, शोभया) अतिशयितां (महतीं, अनुत्तमां, विस्तीर्णां)

श्रुत्वा śrutwā, *ind. p.p.* of श्रु, Hear, hearken, listen.

श्रेणि śreṇi, *s.f.* A line, row. श्रेणीभूत śreṇī-bhūta, *adj.* Ranged in line, forming a row. श्रेणीभूताः 2 *c. pl. f.* (बद्धपङ्क्तीः).

श्रोणी śroṇī, *s.n.* Hip, haunch, buttocks.

श्रोणीभारात् śroṇī-bhārāt, श्रोणी एव (नितम्ब एव) भारस्तस्मात्—(नितम्बगुरुत्वात्, नितम्बातिशयात्, कटिगौरवात्).

श्रोतस् śrotas, *s.n.* The ear: An organ of sense.

श्रोतोरन्ध्र śroto-randhra, *s.n.* A nostril (नासारन्ध्र, नासाग्रकुहर, नासाविवर, करविवर "orifice of the proboscis").

श्रोतोरन्ध्रध्वनितसुभगम् śroto-randhra-dhwanita-subhagam, श्रोतसो (नासारन्ध्रविवरस्य or नासाग्रकुहरेषु) ध्वनितेन (शब्देन) सुखजनकम्—एतेन सौगन्ध्यं प्रतिपादितं.

श्रोत्र śrotra, *s.n.* The ear.

श्रोत्रपेयम् śrotra-peyam (कर्णपेयं, पानार्हं, श्रोत्राभ्यां पेयं, श्रोत्रग्राह्यं, श्रवणयोग्यं, कर्णसुखदं, सादरमाकर्णनीयं "to be heard respectfully").

श्रोष्यति śroshyati, and श्रोष्यसि śroshyasi, 2 *fut. par.* of श्रु śru, Hear, hearken, listen. (आकर्णयिष्यति) It is said in the गुणरसाकर guṇa-rasākara,

ब्रह्मचारी वरो धीमान् मायाभिमानवर्जितः।
धीरोऽपुदारो निःशङ्को वक्ता भूतः स्त्रिया भवेत्॥

"The religious student, a bridegroom, a man of wisdom, free from guile and pride, steady, of a generous soul, and free from suspicion, would be a fit character to hold a conversation with a female."

श्लाघनीय ślāghanīya, *fut. p.p.* (of **श्लाघ** ślāgh) To be praised, deserving of commendation, praiseworthy. **श्लाघनीयाम्** 2 *c. sin. f.* (**साधुवादविषयाम्** sādhuvāda-vishayām, **महादेवप्रशंसनीयां, प्रशंस्यां**).

श्लाघमान ślāghamāna, *pres. p. ātm.* (of **श्लाघ** 1 *cl.*) Praising, flattering, lauding, commending, piquing, priding, pluming, or congratulating one's self, rejoicing. **श्लाघमानः** 1 *c. sin. m.* (**आत्मानं प्रशंसमानः श्लाघ्यो ऽस्मि, आत्मानं धन्यं मत्वा, ईदृशेन सख्या सम्भावितो ऽस्मि**).

ष sha, strong, as in "shut," "bush."

षट्पद् shaṭ-pada, *s.n.* A bee (six-foot).

षट्पद्ज्य shaṭ-pada-jya, *adj.* Strung with bees, bee-strung. **षट्पद्ज्यम्** 2 *c. sin. m.* (**षट्पद एव ज्या (मौर्वी) यस्य तं (चापं)** (**भ्रमरज्यं, भृङ्गगुणं, पौष्पं**).

स sa, dental, as in "sun," "yes."

स sa, a contraction of **सह** saha, With; hence, having, possessed of.

संयोग sanyoga, *s.m.* Intimate union, close contact. **संयोगः** 1 *c. sin.* **संयोगम्** 2 *c. sin.* (**सम्पर्कम्**).

संयोज्य sanyojya, *ind. p.p.* (of **युज्** yuj, Join, *causal form*, with **सम्**) Having united (**मेलयित्वा**).

संरक्त sanrakta, *p.p.* (of **रञ्ज** ranj, with **सम्**) Impassioned, charmed, ravished, enamoured. **संरक्ताभिः** 3 *c. pl. f.* (**भक्ताभिः, अनुरागवतीभिः, मधुरस्वराभिः** "sweet-voiced").

संरोध sanrodha, *s.m.* Obstruction, obstacle, impediment.

संवाहन samvāhana, *s.n.* A rubbing or gentle chafing of the person, a kneading of the limbs, shampooing. **संवाहनानाम्** 6 *c. pl.*

हस्तसंवाहनं कुर्यात् श्रमापनुत्तये ततः ।

"Afterwards he should make a chafing with the hands for the removal of langour."—*Kāma-śāstra.*

संविधाय samvidhāya, *ind. p.p.* (of **धा** dhā, Hold, with **वि** vi and **सम्** sam) Having made.

संशुष्क sanśushka, *adj.* Withered, parched, dry, sere.

संश्रय sanśraya, *s.m.* Protection, succour, refuge, shelter, asylum. **संश्रयाय** 4 *c. sin.* (**आश्रयाय**).

संसक्त sansakta, *p.p.* (of **षञ्ज** shanj, with **सम्** sam) Adhering, sticking or stuck close to.

संसर्पत् sansarpat, *pres. p. par.* of **सृप** 1 *cl.* Go, creep, with **सम्** sam, Glide, flow. **संसर्पन्त्याः** 6 *c. sin. f.* (**सञ्चरन्त्याः, प्रवहन्त्याः, प्रसरन्त्याः, प्रयान्त्याः, अभिसाराय सञ्चरन्त्याः, सङ्क्रामन्त्याः, अतिवेगेन** or **लीलया गच्छन्त्याः**).

संस्कार sanskāra, *s.m.* Decoration, dressing, adornment.

संस्थ sanstha, *agt. in comp.* Staying, sojourning, abiding; a sojourner.

संस्थित sansthita, *p.p.* (of **ष्ठा** shṭhā, Stand, with **सम्** sam) Standing, stationary, fixed, residing.

संहार sanhāra, *s.m.* A collection, assemblage.

सः sah, 1 *c. sin. m.* of **तद्** tad, *pron.* He, she, it, that. For the elision of **ः** see Grammar.

सख sakha, *s.m.* (*in compos.* for **सखि** sakhi) A friend. **सखम्** 2 *c. sin.*

सखि sakhi, *s.m.* A friend. **सखे** 8 *c.* **सखीनाम्** 6 *pl.*

सखी sakhī, *s.f.* A female friend. **सखीम्** 2 *c. sin.* **सख्याः** 6 *c. sin.* **सखीनाम्** 6 *c. pl.* (**वयस्यानां**).

सगर sagara, *s.m.* Name of a king, sovereign of Ayodhyā (Oude).

सगरतनयस्वर्गसोपानपङ्क्तिम् sagara-tanaya-swarga-sopāna-paṅktim, **सगरस्य राज्ञस्तनयानां (सगरात्मजानां, षष्टिसहस्रसङ्ख्याकपुत्राणां) स्वर्गप्राप्तिसत्साधनभूतां** (or **स्वर्गाय** or **स्वर्गारोहणाय** or **आरोहणपरम्परामिव**).

सगर्व sagarva, *adj.* Joyful, glad, exulting, elated, overjoyed. **सगर्वः** 1 *c. sin. m.* (**सदर्पः, हृष्टः सन्, सहर्षः, सोत्साहः त्वज्जलसम्बन्धनीयत्वात्, प्राप्ताभीष्टजलकत्वात्, प्राप्ताकाशजलकत्वात्.**

गर्वो मानकुलैश्वर्यरूपविद्याबलादिभिः ।
इष्टान्नविषयोत्पत्तेर्जायते नीचगोचरे ॥

"In one of ignoble tendencies, pride is generated through respect, family, power, beauty, knowledge, strength, and the like; and from the possession of delicate viands and [similar] objects."

Instead of **इष्टान्न**, some copies have **इष्टार्थ**.

सङ्कल्प saṅkalpa, *s.m.* The working of the mind; thought, imagination, fancy, volition; an acting of the will. **सङ्कल्पैः** 3 *c. pl.* (**मानसकर्मभिः, मनोवृत्तिभिः, मनोरथैः, मानसव्यापारैः, भावनाभिः**).

